मुसपत्ति पद्मादि नारकाक कर्त्ताद्वि तांत
समानाधिकरण्येक अन्यपद नतावाद्धिन
नकाधिकरण कर्म्मवर्त मानत्वे प्राप्ति

किमधीतलघ्वाको
मुधहीता.
नजोमड्ढको

भवतीक कर्त्तरिमिभिव सिलो स्त्रैयविरो बा प्रवृत्तिनी
स्मिन् ध्रुव स्त्रे प्रवृत्तिरास्ति

लण सूत्रेति ष्यति ता लण सूत्रस्य
लण सूत्रस्यार्थ सोऽवर्ण: लण सूत्रस्यावर्ण:
तेन ग्रहणम्॥

कुमुमिं मोदवतीति कुमुदश्चंद्रस्तत्स्ये पं चंद्रिका कौमुदी
पवा कुमुदेः तं मोदयतीवक्ता तावृ न देहति कुमुदे विष्णु तत्स्ये पं
गत कौमुदी॥

ल०कौ०

ॐ श्रीगणेशाय नमः॥ मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च॥ वैयाकरणसिद्धान्तकौमुदीयं विरच्यते॥१॥
अइउण्॥ ऋलृक्॥ एओङ्॥ ऐऔच्॥ हयवरट्॥ लण्॥ ञमङणनम्॥ झभञ्॥ घढधष्॥ जबगडदश्॥
खफछठथचटतव्॥ कपय्॥ शषसर्॥ हल्॥ इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि॥ एषामन्त्या
इतः॥ लण्सूत्रे ऽकारश्च॥ हकारादिष्वकार उच्चारणार्थः॥ हलन्त्यम्॥ हलिति सूत्रे ऽन्त्यमित्स्यात्॥ आ
दिरन्त्येन सहेता॥ अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात् इति हल्संज्ञायाम्॥ हलन्त्य
म्॥ उपदेशे ऽन्त्यं हलित्स्यात्॥ उपदेश आद्योच्चारणं॥ ततो ऽण् अच् इत्यादि संज्ञासिद्धौ॥ उपदेशे
ऽजनुनासिक इत्॥ उपदेशे ऽनुनासिको ऽजित्संज्ञः स्यात्॥ प्रतिज्ञानुनासिक्याः पाणिनीयाः॥ लण्सूत्र
स्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा॥ प्रत्याहारेष्वितां न ग्रहणम्॥ अनुनासिक इत्यादिनिर्दे
शात्॥ न ह्यत्र ककारे परे ऽच्कार्यं दृश्यते॥ आदिरन्त्येनेत्येतत्सूत्रेण कृताः संज्ञाः प्रत्याहारशब्देनोच्यन्ते

१० कौ० राम २

वर्णस्य द्वादश तस्य दीर्घाभावात्॥ एचामपि द्वादश तेषां ह्रस्वाभावात्॥ तुल्यास्यप्रयत्नं सवर्णम्॥ ता
ल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णं स्यात्॥ अकुहविसर्जनीयानां
कण्ठः॥ इचुयशानां तालु॥ ऋटुरषाणां मूर्द्धा॥ ऌतुलसानां दन्ताः॥ उपूपध्मानीयानामोष्ठौ॥ ञमङणा
नानां नासिका च॥ एदैतोः कण्ठतालु॥ ओदौतोः कण्ठोष्ठम्॥ वकारस्य दन्तोष्ठम्॥ जिह्वामूलीयस्य जिह्वा
मूलम्॥ नासिकानुस्वारस्य॥ इति स्थानानि॥ यत्नो द्विधा॥ आभ्यन्तरो बाह्यश्च॥ आद्यश्चतुर्द्धा स्पृष्टे
षत्स्पृष्टविवृतसंवृतभेदात्॥ तत्र स्पृष्टं प्रयतनं स्पर्शानाम्॥ ईषत्स्पृष्टमन्तस्थानाम्॥ विवृतमूष्मणां स्वरा
णां च॥ ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्॥ प्रक्रियादशायां तु विवृतमेव॥ एतच्च सूत्रकारेण ज्ञापितम्॥ त
था हि॥ अ अ॥ विवृतमनूद्य संवृतोऽनेन विधीयते॥ अस्य चाष्टाध्यायीं संपूर्णां प्रत्यसिद्धत्वाच्छा
स्त्रदृष्ट्या विवृतत्वमस्त्येव॥ तथा चोक्तम्॥ पूर्वत्रासिद्धम्॥ अधिकारोऽयम्॥ तेन सपादसप्ता

सो न्न ल्ला त पु त्त स्त्र न्ना ... ॥१ ननु प्रमाणाक्षे ... ध्विनोक प्रा ऽ ज ग ... प्रसाकार पाम स्यव
सो द्य द्य द ... व्गिद्द ... सम्मा मा प घु सिद्धे ... रावंनधा च्या प्रसाकारे ष्विताइ सनुष पनं ॰ प्रत्त ॰ ...
सिद्धमा तु वि ध्य। ... द्रु ॰ प्राप्दिरं म्मेने तत्ताद ष्या दत्त ... मित्ति भाव ॥१

यते॥ ऊकालोऽ[ज्झ्र]स्वदीर्घप्लुतः॥ उश्चऊश्चऊ३श्चवः॥ वांकालइवकालोयस्यसोऽच्क्रमाद्ध्रस्वदीर्घप्लुतसं
ज्ञः स्यात्॥ सप्रत्येकमुदात्तादिभेदेनत्रिधा॥ उच्चैरुदात्तः॥ ताल्वादिषुसभागेषुस्थानेषूर्ध्वभागेनिष्पन्नोऽ
जुदात्तसंज्ञः स्यात॥ ॥ नीचैरनुदात्तः॥ ताल्वादिषुसभागेषुस्थानेष्वधोभागेनिष्पन्नोऽजनुदात्तसंज्ञः स्यात
स्यच्क्रम॥ ॥ समाहारः स्वरितः॥ उदात्तानुदात्तत्वेवर्णधर्मौसमाह्रियेतेयस्मिन्सोऽच्स्वरितसंज्ञः
स्यात॥ तस्यादितउदात्तमर्द्धह्रस्वं॥ ह्रस्वग्रहणमतन्त्रम॥ स्वरितस्यादितोऽर्द्धमुदात्तंबोध्यम॥ उत्तरार्द्धंतुप
रिशेषादनुदात्तम॥ तस्यचोदात्तस्वरितपरत्वेश्रवणंस्पष्टम॥ अन्यत्रतूदात्तश्रुतिः॥ प्रातिशाख्येप्रसिद्धाः॥
क्ववोऽश्वाः॥ रथानांनयेराः॥ शतचक्रं॥ योऽह्यइत्यादिष्वनुदात्तश्रुतिः॥ अग्निमीळेइत्यादावुदात्तश्रुतिः॥ स
नवविधोपिप्रत्येकमनुनासिकाननुनासिकत्वाभ्यांद्विधा॥ मुखनासिकावचनोऽनुनासिकः॥ मुखसहित
नासिकयोच्चार्यमाणोऽनुनासिकसंज्ञः स्यात॥ तदित्थं॥ अइउऋएषांवर्णानांप्रत्येकमष्टादशभेदाः॥ लृ

व. शौ. ८ ३३

यः स्वतः ᳵक ᳶप इति कपाभ्यां प्रागर्द्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ अयोगवाहौ इत्यचः पराव
नुस्वारविसर्गौ ॥ इति प्रयत्नविवेकः ॥ ऋॡवर्णयोर्मिथः सावर्ण्यं वाच्यम् ॥ अकारहकारयोरिकारशकारयोरृकारषका
कारयोः ॡकारसकारयोश्च सावर्ण्ये प्राप्ते ॥ नाज्झलौ ॥ आकारसहितोऽच् सच ह
लच तौ मिथः सवर्णौ न स्तः । तेन दधीत्यस्य हरति शीतलं षष्ठं सान्द्रमित्येतेषु परेषु यणादिकं न । अन्य
था दीर्घादीनामिव हकारादीनामपि ग्रहणकशास्त्रबलादच्त्वं स्यात् । तथाहि । अणुदित्सवर्णस्य चा
प्रत्ययः । प्रतीयते विधीयत इति प्रत्ययः ॥ अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात् ॥ अत्राण् परे
ण णकारेण । तदेवम इत्यष्टादशानां संज्ञा । तथेकारोकारौ ॥ ऋकारस्त्रिंशतः ॥ एवं ॡकारोऽपि ॥ एचो द्वाद
शानाम् ॥ एदैतोरोदौतोश्च न मिथः सावर्ण्यम् ॥ ऐऔजिति सूत्रारम्भसामर्थ्यात् ॥ तेनैचश्चतुर्विंश
तेः संज्ञेति नाशङ्कनीयम् ॥ नाज्झलाविति निषेधो यद्यप्याक्षरसमाम्नायिकानामेव तथापि हकारस्या

ध्यायी प्रति त्रिपाद्यसिद्धा। त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम्॥ बाह्यप्रयत्नस्त्वेकादशधा॥ विवारः
संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति॥ खयां यमाः खयः
[illegible] विसर्गः शर एव च॥ एते श्वासानुप्रदाना अघोषाश्च विवृण्वते। कण्ठमन्ये तु घोषाः स्युः सं
वृता नादभागिनः॥ अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः। वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये
यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः॥ पलिक्क्नीः। चख्ख्नतुः। अग्ग्निः। घ्घ्नन्तीत्यत्र क्रमेण कख
गघेभ्यः परे तत्सदृशा एव यमाः॥ तत्र वर्गाणां प्रथमद्वितीयाः खयः तथा तेषामेव यमाः॥ जिह्वामू
लीयोपध्मानीयौ विसर्गः शरश्च [illegible] विवारः श्वासोऽघोषश्च अन्ये तु संवारा नादो घो
षश्च वर्गाणां प्रथमतृतीयपञ्चमाः प्रथमतृतीययमौ यरलवाश्चाल्पप्राणाः॥ अन्ये महाप्राणा
इत्यर्थः॥ बाह्यप्रयत्ना यद्यपि सवर्णसंज्ञायामनुपयुक्तास्तथा॥ शषसहा ऊष्माणः॥ अ

प्यान्तरतम्यपरीक्षायामुपयो
क्ष्यन्त इति बोध्यम् कादयो मा
वसानाः स्पर्शाः यरलवान्तःस्थाः

नैयेगा वाधा। स्थानेन्त्यात्र प्रसङ्गः स्थानेऽन्तरतमः प्रसंगे सति सदृशतमआदेशः स्यात् यत्रा
नेकविधमान्तर्य्यं तत्र स्थानत आन्तर्य्यं बलीयः तस्मिन्निति निर्दिष्टे पूर्वस्य सप्तमी निर्देशेन विधि
यमाणं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य ज्ञेयम् [illegible] तस्मादित्युत्तरस्य
पञ्चमी निर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम् अलोऽन्त्यस्य षष्ठीनि
र्दिष्टोऽन्त्यस्यादेशः स्यात् ङिच्च अयमप्यन्त्यस्य स्यात् सर्वस्येत्यस्यापवादः आदेः परस्य पर
स्य यद्विहितं तत्स्यादेर्वोध्यम् अलोऽन्त्यस्यापवादः अनेकाल्शित्सर्वस्य अलोऽन्त्यसूत्रा
पवादः अष्टाभ्य औशित्याद्यवादेः परस्येत्येतदपि परत्वादनेन बाध्यते स्वरितेनाधिकारः
स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं वोध्यम् परान्नित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः अ
सिद्धं बहिरङ्गमन्तरङ्गे अकृतव्यूहाः पाणिनीयाः निमित्तविनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं

तांविना येन विधिस्तदन्तस्य विरोमणातदन्तस्य संज्ञास्यात्त्वं स्यच रूपस्य समासप्रत्ययविधौ
प्रतिषेधो वक्तव्यः उगिद्वर्णग्रहणवर्ज्जं विरामोऽवसानं वर्णानामभावोऽवसानसंज्ञः स्यात्
परः सन्निकर्षः संहिता वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् सुप्तिङन्तं पदम् सुबन्तं ति
ङन्तं च पदसंज्ञं स्यात् हलोऽनन्तराः संयोगः अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः ह्रस्वं लघु संयो
गे गुरु संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात् दीर्घं च दीर्घं गुरुसंज्ञं स्यात् ॥ इति संज्ञाप्रकरणम् ॥ इको गु
णवृद्धी गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्रेक इति षष्ठ्यन्तं पदमुपतिष्ठते अचश्च ह्र
स्वदीर्घप्लुतशब्दैर्यत्राज्विधीयते तत्राच इति षष्ठ्यन्तं पदमुपतिष्ठते आद्यन्तौ टकितौ टित्कितौ य
स्योक्तौ तौ तस्य क्रमादाद्यन्तावयवौ स्तः मिदचोऽन्त्यात्परः अचः इति निर्धारणे षष्ठी अचां मध्ये योऽ
न्त्यस्तस्मात्परस्तस्यैवान्तावयवो मित्स्यात् षष्ठी स्थानेयोगा अनिर्धारितसम्बन्धविशेषा षष्ठी स्था

संयोगान्तं यत् तद् दंतं तस्य लोपः स्यात् इति लोपे प्राप्ते यणः प्रतिषेधो वाच्यः यणो मयो द्वे वाच्ये
मय इति पञ्चमी यण इति षष्ठी इति पक्षे यकारस्यापि द्वित्वम् तद्धि धाकारयकारयोर्द्वित्वविकल्प
... एकधमेकयम् द्धधं द्वियम् द्धधमेकयम् एकधं द्धियम् सुद्ध्युपास्यः मध्वरिः
धात्रंशः लाकृतिः नादिन्याक्रोशे पुत्रस्य पुत्रशब्दस्य न द्वे ... निशब्दे परे आक्रोशगम्ये पुत्रादिनी त्व
मसि पापे आक्रोशे किं तत्र कथने द्वित्वं न स्यात् पुत्रादिनी ... तत्परे च पुत्रपुत्रा
दिनी त्वमसि पापे वा हतजग्धयोः पुत्रहती पुत्रहती पुत्रजग्धी पुत्रजग्धी त्रिप्रभृतिषु शाकटाय
नस्य त्रिप्रभृतिषु वर्णेषु संयुक्तेषु वा द्वित्वं इन्द्रः इन्द्रः राष्ट्रम् राष्ट्रम् सर्वत्र शाकल्यस्य द्वित्वं न अर्कः
ब्रह्मा दीर्घादाचार्याणाम् द्वित्वं न दात्रं पात्रम् अचो रहाभ्यां द्वे अचः परौ यौ रेफहकारौ
परस्य यरो द्वे वाच्ये तः हर्य्यनुभवः नह्यस्ति हलो यमां यमि लोपः हलः परस्य यमो लोपो वा स्या

नकुर्वन्तीत्यर्थः इतिपरिभाषाप्रकरणम् इकोयणचि इकस्थानेयण्स्यादचिसंहितायां
विषये सुधीउपास्यइतिस्थिते स्थानंतआन्तर्यादीकारस्ययकारः सुध्यउपास्यइतिस्थिते
अनचिच अचःपरस्ययरोद्वेवास्तोनत्वचिइतिधकारस्यद्वित्वम् स्थानिवदादेशोऽनल्विधौ आ
देशःस्थानिवत्स्यान्नतुस्थान्यलाश्रयविधौ अनेनेहयकारस्यस्थानिवद्भावेनाच्त्वमाश्रित्यानचि
चेतिद्वित्वनिषेधोनसंभवः नल्विधाविति तन्निषेधात् अचःपरस्मिन्पूर्वविधौ अल्विधयर्थमिदं प
रनिमित्तोऽजादेशःस्थानिवत्स्यात् स्थानिभूतादचःपूर्वत्वेनदृष्टस्यविधौकर्तव्येइतियणःस्थानिव
द्भावेप्राप्ते नपदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु पदस्यचरमावयवेद्वि
र्वचनादौचकर्तव्येपरनिमित्तोऽजादेशोनस्थानिवत्स्यात् इतिस्थानिवद्भावनिषेधः झलांजशझशि
स्यद्धम् इतिधकारस्यदकारः अदर्शनंलोपः प्रसक्तस्यादर्शनंलोपसंज्ञंस्यात् संयोगांतस्यलोपः

काकाक्षिगोलकन्यायेनेति
शब्दस्य उभयत्रापि संबंधः २

कारेण सवर्णास्तत्राकारस्यापि ग्रहणं स्यात् तेन विश्वपाभिरित्यत्र होढ इति ढत्वं न स्यात् अनुनासिका
ननुनासिकभेदेन यवला द्विधा तेनानुनासिकास्ते द्वयोर्द्वयोः सञ्ज्ञा तपरस्तत्कालस्य तपरो यस्मा
त्स च तात्परश्चोच्चार्यमाणसमकालस्यैव सञ्ज्ञा स्यात् तेन अत् इत् उत् इत्यादयः षण्णां षण्णां सञ्ज्ञा ऋत्
इति द्वादशानाम् वृद्धिरादैच् आ ऐ औ च वृद्धिसञ्ज्ञः स्यात् अदेङ्गुणः अदेङ् गुणसञ्ज्ञः स्यात् भू
वादयो धातवः क्रियावाचिनो भ्वादयो धातुसञ्ज्ञाः स्युः प्राग्रीश्वरान्निपाता इत्यधिकृत्य चादयो
ऽसत्वे अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः प्रादयः अद्रव्यार्थाः प्रादयस्तथा उपसर्गाः क्रियायोगे
गतिश्च प्रादयः क्रियायोगे उपसर्गसञ्ज्ञा गतिसञ्ज्ञाश्च स्युः प्र परा अप सम् अनु अव निस् निर्
दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप एते प्रादयः नवेति विभाषा निषेध
विकल्पयोर्विभाषासञ्ज्ञा स्यात् स्वं रूपं शब्दस्याशब्दसञ्ज्ञा शब्दस्य स्वं रूपं सञ्ज्ञि शब्दशास्त्रे या संज्ञा

स्वरूपादे
वा।

ननु स्वरूपमिति सूत्रे किमर्थं शब्दग्रहणं कृतं अर्थस्य सर्वत्र वैदिके लौकिके च शब्दे तत्प्रतीति ग्रहणस्यार्थस्य संज्ञाभावे ऽग्नेर्ढगित्यादि
प्रयोगेऽपि प्रसक्तत्वात् तदर्थं स्वरूपग्रहणं न मध्ये शब्दस्य स्वरूपग्रहणं किमर्थं विनापि तदग्रहणे स्वपाठे
स्वरूपमेव ग्राह्यं तत्र प्रतिज्ञा सूपदेशोन्यथा पदान्तादर्शनाद धारणादर्शनात् तदाधारणा तत्र वा स्वरूपं वा प्राप्यते इति कथं
च प्रतीतो घ पर्यायः संबन्धः ग्रहणमपि दृष्टं प्रत्यय वैज्ञानिकं तद्धर्मे यो बोधो परम पर्याय रीत्या पृथक्प्रसक्तात्
साधारणशब्दस्वरूपं न निरंगः तत्पाञ्चानुकरणादपि तद्धर्मेभ्यो भिन्नं स्वरूपादावर्णं स्वतन्त्रपदतो प्राप्यते इति
का भावी तद प्रतीतिरानि पत्तो प्रसक्त इति कश्चेति किमनेन स[illegible] रूपग्रहणेन उच्यते इह स्वरूप
स्यापि विवक्षितो रूपवदितिलावमर्थं स्वरूपग्रहणं तेन पीव ग्रहणे नानं पर्यायसंसर्गान्यत्र
भवति तच्चोक्तं तापकादप्यर्थां ग्राह्यः स्वरूपमिति वचनात् स्वरूपापत्ति भिन्न संकरमणि वाचनात् पक
भवति तच्चोक्तं तापकादि समुदायवचनेन तु स्वरूपग्रहणे नैव समर्पिमयं विनापि तेन कार्यं कृते
तस्मात् समुदायवचनेन तु [illegible] स्वरूपमित्यत्र अस्ते ह प्राप्तिर्भवति भाव तद्वत् तावत् केवलम्
समुदाये स्पष्टं तस्य वृत्ति पर्यायतोनभवति [illegible] स्वरूपमिति भिन्नपुरुषं प्रकारान्तरेषु वाच्यवादे भवति यत्र पर्यायतोऽर्थ भिन्नत्वं भावे केवलं स्वरूपमेव
स्पष्टं संज्ञाकरणे नहि तत्र संस्कृतीयमपि शास्त्रस्य स्वरूपत्वं महत्तत्त्वं शब्दान्तराणि व्याख्यानमाहात्म्यात् भवति तेनो पसर्जनेभ्यो किं भवितव्यमिति
पर्यासादृं न सर्वेषु नित्यत्वं तेनैव सामान्यसिद्धवचनसामर्थ्यात् व्याख्यानतोऽर्थं स्वरूपं ज्ञानमे
वास्याः प्रत्यन्तेषु स्वरूपमपि भवति ॥ ५१

प्रौहः प्रौढः अर्थवद्ग्रहणान्नानर्थकस्यग्रहणम् इत्युक्तेः सूत्रेराजेः पृथक् प्राजिग्रहणात् तेने
जग्रहणेनक्रान्तमेवगृह्यते तेनतुक्तेवक्तव्यमेकदेशः प्रौढवान् प्रौढिः इषुइच्छायांतुदादि इष
गतौदिवादिः इषआभीक्ष्ण्ये क्र्यादिः एषांघञिएषः तिचएषः एष्यः इति [illegible] नेन
वृद्धि प्रैषः प्रैष्यः यस्तु ईषउञ्छे यश्चईषगतिहिंसादर्शनेषु तयोर्दीर्घोपधत्वात् ईषः ईष्यः
तत्रापिगुणे प्रेषः प्रेष्यः ऋतेचतृतीयासमासे सुखेनऋतः सुखार्तः तृतीयेतिकिंपरमर्तः प्रवत्सत
रकम्बलवसनार्णदशानामृणे प्रार्णम् वत्सतरार्णम् ऋणस्यापनयनायपदन्यदृणं क्रियते
तदृणार्णं दशार्णमदेशः नदीचदशार्णा ऋणशब्दो दुर्गभूमौजलेच उपसर्गादृतिधातो अवर्णा
न्तादुपसर्गादृकारादौधातौवृद्धिरेकादेशःस्यात् उपार्च्छति प्रार्च्छति अन्तादिवच्च योयमेकादे
शः सपूर्वस्यान्तवत्परस्यादिवत्स्यात् इतिरेफस्यपदान्तत्वे खरवसानयोर्विसर्जनीयः खरि

उत कंठा पाभावः
उतकंठपक्षधम स्य. उत

असतो द्वित्वलोपयोरिष्टार्थः २ =

तिपद्मे द्वित्वं तस्य कुरे कुरिसवर्णौ हलः परस्य सरोणं लोपो वा स्यात् सवर्णौ कारे द्वित्वाभावे लोपे सति प
कधम् अस्मिति लोपे द्वित्वलोपयोर्वा द्विधम् सति द्वित्वे लोपे असति त्रिधं कृष्णर्द्धिः यणा इति पञ्चमीम
प इति मद्धी तिपद्मे ककारस्यापि द्वित्वं लक्ष्यवनाचिये इति तेन तवकं लकारइत्यत्र पचतु व्यम् द्वि
त्वलस्यैव ककारस्यैव नाभयो रूगयोरपि तवल्कारादिषु वृद्धेर्वो ध्यरू पचतद्व्यम् वृद्धिरेचि आदेचि परे
वृद्धिरेकादेशः स्यात् गुणापवादः कृष्णैकत्वं गङ्गौघः देवैश्वर्यम् कृष्णौत्कण्ठ्यम् एत्येधत्यूठ्सु अ
वर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात् पररूपगुणापवादः उपैति उपैधते प्रष्ठौहः
एजाद्योः किं उपेतः मा भवान् प्रेदिधत् दित्यनुर्व्यभिचारसंभवात् पुरस्तादपवादन्यायेन वृद्धिरेङि
पररूपमित्यस्यैव बाधिका न तु ओमाङोश्चेत्यस्य तेनावैहीति वृद्धिरसाधुरेव अक्षादूहिन्यामुपसंख्यानम्
अक्षौहिणी सेना स्वादिरेरिणोः स्वैरः स्वैरी स्वैरिणी प्रादूहोढोढ्येषैष्येषु

शकंध्वादिषु पररूपं वाच्यम्

शकं-ध्वादिषु पररूपं वाच्यम् तच्च टेः शकंधुः कर्कन्धुः कुलटा सीमंत केशवेशे सीमान्तोन्यः म
नीषा लाङ्गलीषा पतञ्जलिः सारङ्गः पशुपक्षिणोः सारङ्गोन्यः आकृतिगणोयम् मार्तण्डः
ओत्वोष्ठयोः समासेवा स्थूलोतुः स्थूलौतुः विम्बोष्ठः विम्बौष्ठः समासेकिम् तवौष्ठः ओमा
ङोश्च ओमि आङि चात्पररूपमेकादेशःस्यात् शिवायोम्नमः शिव एहि शिवेहि अव्यक्तानु
करणस्यातइतौ ध्वनेरनुकरणस्य योऽ[illegible] शब्दस्तस्मादितौ परे पररूपमेकादेशःस्यात् पटइति पटि
ति एकाचोनप्रातइति श्रदिति नाम्रेडितस्यान्त्यस्यतुवा आम्रेडितस्य [illegible] उक्तंनस्यात् अन्त्य
स्यतुतकारमात्रस्यवास्यात् डाचिवहुलंद्वेभवतइति वहुलवचनाद्द्वित्वम् तस्यपरमाम्रेडि
तं द्विरुक्तस्यपररूपमाम्रेडितसंज्ञंस्यात् पटपटेति [illegible] कलाजणोन्ते [illegible] कलाणजणः
स्युः [illegible] पटत्पटदिति अकःसवर्णेदीर्घः अकःसवर्णेऽचिपरेदीर्घएकादेशःस्यात् दैत्या

अवसानेच रेफस्य विसर्जनीयः स्यात् पदान्ते इति विसर्गे प्राप्ते अन्तवद्भावेन पदान्तत्वस्य न विसर्गः
उभयथर्क्षु कर्तरि चर्षिदेवतयोरित्यादिनिर्देशात् उपसर्गेणैव धातोराक्षेपे सिद्धे धाताविति योगवि
भागेन पुनर्विधानार्थम् तेन अल्पक इति याज्ञिकोऽपि प्रकृतिभावोऽत्र न वा सुप्यापिशलेः अ
वर्णान्तादुपसर्गादृकारादौ सुब्धातौ वृद्धिर्वा स्यात् आपिशलिग्रहणं पूजार्थम् प्रार्षभीयति प्र
र्षभीयति सावर्ण्यात् ल्कारीयति प्लकारीयति तपरत्वाद्दीर्घे न उप ऋकारीयति उपकारी
यति एङि पररूपं आदुपसर्गादेङादौ सुब्धातौ परे पररूपमेकादेशः स्यात् प्रेजते उपोषति
इह वा सुपीत्यनुवर्त्य वाक्यभेदेन व्याख्येयम् तेन एङादौ सुब्धातौ वा उपेडकीयति उपैडकीय
ति प्रोघीयति प्रौघीयति एवे चानियोगे नियोगोऽवधारणम् क्वेव भोक्ष्यसे अनवक्लृप्तावेवश
ब्दः अनियोगे किम् तवैव अचोऽन्त्यादि टि अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् शक
[illegible] नियमेऽपि पदा भवेदिति

आङ्गुणो ओ पते ओयत् क्षय्यजय्यौ शक्यार्थे यान्तादेशनिपातनार्थमिदम् क्षेतुं शक्यं क्षय्यं जेतुं शक्यं जय्यम् शक्यार्थे किं क्षेयं पापं जेयं मनः क्रय्यस्तदर्थे तस्मै प्रकृत्यर्थाय यद्भवति तदर्थम् क्रेतारः क्रीणीयुरिति बुध्या आपणे प्रसारितं क्रय्यम् क्रेयमन्यत् क्रयणार्हमित्यर्थः लोपः शाकल्यस्य अवर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपोऽशि परे पूर्वत्रासिद्धमिति लोपशास्त्रस्यासिद्धत्वान्न स्वरसंधिः हरयेहि हरएहि विष्णविह विष्णइह श्रिया उद्यतः श्रियायुद्यतः गुरा उत्तः गुरावुत्तः कानि सन्ति कोऽस्ति इत्यत्रासोरल्लोपस्य स्थानिवत्वेन यणादेशे प्राप्ते न पदान्तेति सूत्रेण पदान्तविधौ तन्निषेधान्न स्तः एकः पूर्वपरयोरित्यधिकृत्य आद्गुणः अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात्संहितायां विषये उपेन्द्रः रमेशः गंगोदकं उरण्रपरः ऋ इति त्रिंशतः संज्ञेत्युक्तम् तत्स्थाने यो गुणः स रपरः सन्नेव प्रवर्तते तत्रान्तरतम्यात् कृष्णर्द्धिः तवल्कारः इत्यत्रापि अचोरहाभ्यामि

यमिपरे इति लोपपक्षे द्विलाभावपक्षे चैकयं रूपं तुल्यम् लोपारंभफलं तु आदित्यो देवतास्य आदि
त्यं हविः ॥ इति यथासंख्यविज्ञानान्नेह माहात्म्यम् एचोऽयवायावः एचः क्रमादय्
अव् आय् आव् एते स्युरचि तस्य लोपः तस्य लोपः स्यादिति यवयोर्लोपेन उच्चारणसामर्थ्यात् एव
चेत्संज्ञापि लुप्तन स्यात् हरये विष्णवे नायकः पावकः वान्तो यि प्रत्यये यकारादौ प्रत्यये परे ओदौतौ
रवावादेशौ स्तः गोर्विकारो गव्यम् गोपयसोर्यत् नाव्यातार्य्यम् नाव्यम् नौवयोधर्मेत्यादिना य
त् गोयूतौ छन्दस्युपसंख्यानम् अध्वपरिमाणे च गव्यूतिः ऊतियूति इत्यादिना यूतिशब्दो निपा
तितः वान्त इत्यत्र वकाराद्यो यूतावित्यत्र ककाराद्यूपूर्वभागे लोपो व्योरिति लोपेन वकारः प्रसिद्ध्य
ते तेन श्रूयमानवकारान्त आदेशः स्याद्वकारो न लुप्यत इति यावत् धातोस्तन्निमित्तस्यैव यादौ प्र
त्यये परे धोरेच्छश्चेद्वान्तादेशः स्यात् इति तन्निमित्तस्यैव नान्यस्य लव्यम् अवश्यलाव्याम् तन्निमित्तस्यैवेति किं

दचतत्कोप्य्वातिकैप्र
तबापीवोच्या१८ चैद्दि ॐ
तमा

नतुवानोपु पुरचरत्नासेन स्तकेवेनोरव
ञ्चवकारादिस्यदिवद्, त्र हक्रिमेचे तवंचेत
नदि गमुतिरिसत्रव स्यत्तिसवें
तिकोदत्ताकत्तस्वतिवालोपस्यार
तउकवात्तदसत्रेलिनचः विकोववि
विलिजेनवालादेगस्यका विध
वकेवेनसतिचलोषेकर्णिं वत्तच
निमितवृबाधः दत्तवाचां नचवाचां
कुलनिमितलानाक्रतविमवे द
स्यचारिताप्पी तवेवबनाकात्
लोकेकोदहरणभावेनेतस्यन
दनतपाद्देदस्येवदर्णनातत्
त्रेगम्यादेमवेनवाततस्यवदकृ
भावातले स्यत्रचततदभावा
तलोका चेनकुरातप्वं प्रके
रास्यनत लेरवंतत्कृविति
केरवप्रके प्राउचित>प्पतछक्त
रावेस्तुतं॰ नोवोआरितस्तु
वकारप्रसारवाकनंतोवेका
दाकरणभावेनतदंपैतपवो
ध्यंतवेववि्षयबसादोतस्यलो
प८ तिदव्वीरामितिवाचांननवा
चांकुजउच्चारणसामर्ध्यात मैव
उच्चारणस्यतुनसमिपातत्स्य
तुगमुतिसदैवारताप्पीहात् प
लविकवेसादोनलोपकतोन्२प्र

नं>बाहगनवचुकेरसादिनरिदरीवं
रणात्मवतिर॰
तिदिक
१०

नगुर कारणाकार ... स्थाने ... प्र च साव र्ण्य कलोने एङंतस्यक्विंचित्रगवं१० चित्रं ...
... प्रत ... प्रा ... ।

तेः श्रीशः विष्णूदयः ऋच्छति किं कुमारीशेते नाज्झलाविति सावर्ण्यनिषेधस्तु न दीर्घणकारयोः ग्रहण
कशास्त्रस्य सावर्ण्यविधिनिषेधाभ्यां प्रागनिष्पत्तेः अकः किं हरये अकोकि दीर्घ इत्येवसुवच्चं ऋति
सवर्णे ऋ वा होतॄकारः होतृकारः लृति सवर्णे लृ वा होतॢकारः पक्षे ऋकारः सावर्ण्यात् होतृकारः ऋ
ति ऋ वा लृति लृ वेत्युभयत्रापि विधेयम् वर्णद्वयं द्विमात्रम् आद्यस्य मध्ये द्वौ रेफौ तयोरेका मात्रा अभि
तोज्झभक्तेरपरा द्वितीयस्य तु मध्ये द्वौ लकारौ शेषं प्राग्वत् इहोभयत्रापि ऋत्यक इति पाक्षिकः प्रकृति
भावो वक्ष्यते एङः पदान्तादति पदान्तादेङोति परे पूर्वरूपमेकादेशः स्यात् हरेव विष्णोव सर्वत्र विभा
षा गोः लोके वेदे च गोरति वा प्रकृतिभावः स्यात्पदान्ते गोअग्रं गोग्रं पदान्ते किं गोः अवङ् स्फोटायनस्य अ
तीति निवृत्तं पदान्ते अचि परे गोरवङ् वा स्यात् गवाग्रम् पदान्ते किं गवि व्यवस्थितविभाषया गवा
क्षः इन्द्रे च गोरवङ् स्यादिन्द्रे गवेन्द्रः अप्रकृतिभावः प्लुतप्रगृह्या अचि नित्यम् प्लुताः प्रगृ

प्रकृत्याप पा व स्या ...

... प्रा प्लुते ...

न भिवद्देवदत्ता ३ है३हे प्रयोगे है हयोः एतयोः प्रयोगे दूराद्धूते यन्तत्र है हयोरेव प्लुतः स्यात् है३राम
राम हे३ हे राम राम हे३ गुरोरनृतोनन्त्यस्याप्येकैकस्य प्राचाम् दूराद्धूते यद्वाक्यं तस्य यन्त्र द्विनस्या नौ पि तस्या २
गुरोर्वा प्लुतः स्यात् दे३वदत्त देवदा३त्त देवदत्ता३ गुरोः किं वकारादकारस्य मा भूत् अनृतः किम्
कृष्णा३ एकैकग्रहणं पर्यायार्थं इह प्राचामिति योगो विभज्यते तेन सर्वः प्लुतो विकल्प्यते अप्लुतवदु
पस्थिते उपस्थितोऽनार्ष इति पाठस्तस्मिन्परे प्लुतोऽप्लुतवद्भवति अप्लुकोऽर्थायणा दूर्ककरोतीत्यर्थः ते ११
सुश्लोकाऽ इति सुश्लोकेति वा किम् अप्लुत इत्युक्ते प्लुत एव विधीयेत तथाच प्रगृह्याश्रयः प्रकृति
भावः प्लुतस्य स्वरवर्णा न स्यात् अग्नी३ इति ईचाक्रवर्मणस्य ईप्लुतोऽचि परे अप्लुतवद्वा चिनुहि३
इदं चिनुहीदम् चिनुहि३ इति चिनुहीति उभयत्र विभाषेयम् ईदूदेद्द्विवचनं प्रगृह्यम् ईदूदेद्द्वि दतं २
वचनं प्रगृह्यं स्यात् हरी एतौ विष्णू इमौ गङ्गे अमू पचेते इमौ मणीवोष्ट्रस्येति तु इवार्थे वशब्दो

परे निसं

त्यास्थवत्स्यंते तेऽर्थे प्रकृत्यास्तुः एहि कृष्ण अत्र गौश्चरति हरी एतौ नित्यमिति किम् हरी एतावित्यादाव
यमेव प्रकृतिभावो यथा स्यात् इकोऽसवर्णे इति ह्रस्वसमुच्चितो मा भूत् इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च पदा
न्ताः इकोऽसवर्णेऽचि परे प्रकृत्यास्तुः ह्रस्वश्च वा अत्र ह्रस्वविधिसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणा
र्थश्चकारो न कर्तव्य इति भाष्ये स्थितम् चक्रि अत्र चक्र्यत्र पदान्ता इति गौर्यौ नसमासे वाप्यश्वः सिति
च पार्श्वं ऋत्यकः ऋति परे अकः शाकल्यस्य वृक्ष ऋषिः वृक्षर्षिः पदान्ता इत्येव आर्छत समासेऽप्ययं प्र
कृतिभावः सप्तऋषीणाम् वाक्यस्य टेः प्लुत उदात्त इत्यधिकृत्य प्रत्यभिवादेऽशूद्रे अशूद्रविषये प्र
त्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात् स चोदात्तः अभिवादये देवदत्तोऽहम् भो आयुष्मानेधि देवद
त्त३ स्त्रियां न अभिवादये गार्ग्यहं भो आयुष्मती भव गार्गि नामगोत्रवाचस्य प्रत्यभिवादवाक्यान्ते प्रयु
ज्यते तत्र प्लुत इष्यते नेह आयुष्मानेधि भो राजन्य विशां वेति वाच्यम् आयुष्मानेधि भो आयुष्मानेधि
द्रवर्म्मा३न् आयुष्मानेधीन्द्रपालिता३ दूराद्धूते च दूरात्सम्बोधने यद्वाक्यं तस्य टेः प्लुतः स्यात् सक्तू

अणग्रहणं किम् वृत्तावर्थान्तरोपसंक्रान्ते माभूत् वाय्वम्बौ वाय्वम्बुः अणोऽप्रगृह्यस्यानुनासिकः अ
प्रगृह्यस्याणोऽवसानेऽनुनासिको वा स्यात् दधि दधिँ अप्रगृह्यस्य किम् अग्नी इति ॥ इत्यच्सन्धिः २
स्तोः श्चुना श्चुः स्तोः सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः हरिश्शेते रामश्चिनो
ति सच्चित् शार्ङ्गिञ्जयः शात् शात्परस्य तवर्गस्य चुत्वं न विश्नः प्रश्नः ष्टुना ष्टुः स्तोः ष्टुना योगे ष्टुः स्यात्
रामष्षष्ठः रामष्टीकते पेष्टा तट्टीका तट्टीकते चक्रिण्ढौकसे न पदान्ताट्टोरनाम् अनामिति लुप्तषष्ठी
कम् पदान्ताट्टवर्गात्परस्यानामः स्तोः ष्टुर्न स्यात् षट्सन्तः षट् ते पदान्तात् किं ईट्टे टोः किम् सर्पिष्टमम् अना
मनवतिनगरीणामिति वाच्यम् षण्णवतिः षण्णगर्यः तोः षि तवर्गस्य षकारे परे न ष्टुत्वम् सन्षष्ठः झ
लां जशोऽन्ते वागीशः चिद्रूपम् यरोऽनुनासिकेऽनुनासिको वा यरः पदान्तस्यानुनासिके परेऽनुनासि
को वा स्यात् एतन्मुरारिः एतद्मुरारिः स्थानप्रयत्नाभ्यामन्तरतमे स्पर्शे चरितार्थो विधिरयं रेफे न प्रवर्त्त
ते चतुर्मुखः प्रत्यये भाषायां नित्यम् तन्मात्रम् चिन्मयम् कथं तर्हि मदोदग्राः ककुदुत्तुङ्ग

राम १२

वापह्नोवावोध्यः अदसोमात् अस्मात्परावीदूतौ प्रगृह्यौस्तः अमीईशा रामकृष्णावमू आसाते
मात्किम् अमुकेऽत्र असतिमात्कुह। एकारोप्यनुवर्त्तेत एे अयंप्रगृह्यः अमेइन्द्रावृहस्पती
निपातएकाजनाङ्. एकोचनिपातश्चाङ्वर्ज्जः प्रगृह्यः स्यात् इविस्मये इइन्द्रः उउमेशः
आनादिङ्त्युक्तेरङ्दाकारःप्रगृह्यएव आएवंनुमन्यसे आएवंकिलतत् ङित्तुनप्रगृह्यः ईषदुष्ण
ओष्णम् वाक्यस्मरणयोरङित् अत्र ङित्वविवेकः ओत् ओदन्तोनिपातः प्रगृह्यः अहोईशा
संबुद्धौशाकल्यस्येतावनार्षे संबुद्धिनिमित्तकओकारोवाप्रगृह्योऽवैदिके इतौ परे विष्णोइति विष्णव
इति अनार्षेकिं ब्रह्मबन्धवित्यब्रवीत् उञः उञइतोवाप्रागुक्तम् उइति विति ऊँ उञ् इतोदीर्घोनु
नासिकः प्रगृह्यश्च ऊँइत्ययमादेशोवा ऊँइति मयउञोवोवा मयः परस्यउञोऽचिपरेवोवास्यात् किम्वु
क्तम् किमुउक्तम् वस्यासिद्धत्वान्नानुस्वारः ईदूतौचसप्तम्यर्थे सप्तम्यर्थे पर्य्यवसन्नौ दूदन्तंप्रगृह्यंस्यात्॥
सोमोगौरीअधिश्रितः मामकीतनू [illegible] सुपोसुलुगिति सप्तम्यालुक्

संयंता२ संवत्सर२ यंल्लोकं२

नुस्वारस्य ययि परसवर्णः तस्यासिद्धत्वान्नणत्वं वा पदान्तस्य पदान्तस्यानुस्वारस्य ययि परे परसवर्णो वा स्यात् त्वङ्करो
षि त्वंकरोषि संयँता संवत्सरः यँल्लोकं अनुस्वारस्य पक्षे त्वनुनासिका यवलाः मो राजि समः क्वौ क्वि
बन्ते राजतौ परे समो मस्य म एव स्यात् सम्राट् हे मपरे वा मपरे हकारे मस्य म एव स्याद्वा ह्मल सञ्चल
ने किम्ह्मलयति किंह्मलयति यवलपरे यवला वेति वक्तव्यम् यथासंख्यमनुदेशः समानाम् सम
संबधी विधिर्यथासंख्यं स्यात् कियँह्यः किंह्यः किवँह्वलयति किंह्वलयति किलँह्लादयति किं
ह्लादयति नपरे नः नपरे हकारे मस्य नः स्याद्वा किन्ह्नुते किंह्नुते ङ्णोः कुक्टुक् शरि ङकारण
कारयोः कुक् टुक् वा आगमौ वा स्तः शरि कुक्टुकोरसिद्धत्वाज्जश्त्वं न चयो द्वितीया शरि पौष्करसादेः
प्राङ्क्षष्ठः प्राङ्ख्षष्ठः प्राङ्षष्ठः सुगण्ट्षष्ठः सुगण्ठ्षष्ठः सुगण्षष्ठः डः सि धुट् डा
त्परस्य सस्य धुड्वा स्यात् षट्त्सन्तः षट्सन्तः नश्च नकारान्तात्सस्य धुड्वा सन्त्सः सन्सः शि तुक् नस्य
पदान्तस्य शे परे तुग्वा शश्छोटीति छत्वविकल्पः पक्षे झरो झरीति चलोपः सञ्छम्भुः सञ्च्छम्भुः

तिपवादिगणे दकारनिपातनात् तोर्लि तवर्गस्य लकारे परे परसवर्णः स्यात् तल्लयः विद्वाँल्लिखति नस्या
नुनासिको लः उदः स्थास्तम्भोः पूर्वस्य उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात् आदेः परस्य उत्थानं उ
त्तंभनं अत्राघोषस्य महाप्राणस्य सस्य तादृश एव थकारः तस्य झरो झरीति पाक्षिको लोपः लोपा
भावपक्षे तु थकारस्यैव श्रवणम् न तु खरि चेति चर्त्वम् चर्त्वं प्रति थस्यासिद्धत्वात् झयो होऽन्यतरस्या
म् झयः परस्य हस्य पूर्वसवर्णो वा स्यात् घोषवतो नादवतो महाप्राणस्य संवृतकण्ठस्य तादृशो वर्गचतु
र्थ एवादेशः वाग्घरिः वाग्हरिः शश्छोऽटि झयः परस्य शस्य छो वा स्यादटि दस्य चुत्वेन जकारे कृते खरि
च खरि कृते चर्त्वं इति जकारस्य चकारः तच्छिवः छत्वममीति वाच्यम् तच्छ्लोकेन अमि किं वाक्
श्च्योतति मोऽनुस्वारः मान्तस्य पदस्यानुस्वारः स्याद्धलि अलोऽन्त्यस्य हरिं वन्दे पदस्येति किं गम्यते नश्चा
पदान्तस्य झलि नस्य मस्य चापदान्तस्य झल्यनुस्वारः यशांसि आक्रंस्यते झलि किं मन्यते अनुस्वारस्य
ययि परसवर्णः अङ्कितः अञ्चितः कुण्ठितः शान्तः गुम्फितः कुर्वन्तीत्यत्र णत्वे प्राप्ते तस्यासिद्धत्वाद्

अथ्यान्तेर जय पंचमिति षाष्ठि

अद्ध्वदान्त स्यङ्गिराज मि॰

सर्वं १ ... सवा पेति।

कौसं
राम०१४

दृश एवामस्यादृशानां तकारादित्वे क्वनान्तरे णपुनर्द्वित्वे एकतं द्वितं त्रितमिति चतुःपंचामात् अ
णोऽनुनासिकत्वे १ खोत्तरमातम् पुमः खय्यम्परे अम्परे खयि पुमशान्तस्य रुः स्यात् व्युत्पत्तिपक्षे
अप्रत्ययस्येति मत्वपर्युदासात् ॰ क ॰ पयोः प्राप्तेऽव्युत्पत्तिपक्षे तु मत्वप्राप्नोति संपुंकानामिति सः
पुंस्कोकिलः पुंस्कोकिलः पुंस्पुत्रः पुंस्पुत्रः अम्परे किं पुंक्षीरं खयि किं पुंदासः ख्याञादेशे न
पुंख्यानम् नश्छव्यप्रशान् अम्परे छवि नकारान्तपदस्य रुः स्यात् न प्रशान्शब्दस्य विसर्गः स
त्वं स्तुत्वं शार्ङ्गिंश्छिंधि शार्ङ्गिंश्छिंधि चक्रिंस्त्रायस्व चक्रिंस्त्रायस्व पदस्येति किं हंति अम्प
रे किम् सन्त्सरुः मद्गुत्सरुः अप्रशान् किं प्रशान् तनोति नॄन्पे नॄनित्यस्य रुः स्याद्वा पकारे परे
कुप्वोः ॰ क ॰ पौ च कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमात् जिह्वामूलीयोपध्मानीयौ स्तः चाद्विस
र्गः येननाप्राप्तिन्यायेन विसर्जनीयस्य सत्वस्यापवादोऽयं न तु शर्परे विसर्जनीयः इत्यस्य तेन वा रुः स
हेमन्मित्यादौ विसर्ग एव नॄं॰पाहि नॄं॰पाहि नॄं॰पाहि नॄः पाहि नॄन्पाहि कानाम्रेडिते कान्का

सञ्ज्ञां भुः सञ्ज्ञां भुः जह्वो जच्यह्नो जच्यस्नो जणाविति स्व्यचतुष्टयं रूपाणामिह तुक छस्य लोप
नो विकल्पनात ङमो ह्रस्वादचिङमुण्नित्यम ह्रस्वात्परो यो ङम तदंतं यत्पदं तस्मात्परस्याचो नि
त्यं ङमुडागमः स्यात प्रत्यङ्ङात्मा सुगण्णीशः सन्नच्युतः समः सुटि समो रुः स्यात्सुटि अत्रोत्यस्य
अत्रानुनासिकः पूर्वस्य तु वा अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात अनुनासिकात्परोनुस्वारः
अनुनासिकं विहाय रोः पूर्वस्मात्परो नुस्वारागमः स्यात खरवसानयोर्विसर्जनीयः खरि विस
र्जनीयस्य सः स्यात एतदपवादे वा शरीति याहिके विसर्गो वा पे सयुक्तानांसोवक्तव्यः संस्कर्ता
संस्कर्ता समो वा लोपमेके इति भाष्यम लोपस्यापि रुप्रकरणस्थत्वादनुस्वारानुनासिकाभ्यामेक
सकाररूपद्वयम द्विसकारं तु क्तमेव त्रानुस्वारेति सकारद्वित्वपक्षे त्रिसकारमपि रूपद्वयं अ
नुस्वारविसर्गी जिह्वामूलीयोपध्मानीयनामकारो परिणामच्च पाठस्योपसंख्यातत्वेनानुस्वारस्याप्य
चत्वात अनुनासिकवतां त्रयाणां मारः खय इति द्वित्वे अष्टौ अनुस्वारवतामनुस्वारस्यापि द्वित्वे द्वा

मेन मैवं पूर्वीन्तले तु नपदान्ता टोरितनि वेधाप्रत्रसा धाकारस्य पुत्वप्रस गास्तन्प्र तएवत्वल मामास्तु गिद्वेत्वन क्षास:ड

रामः स्या ता राम स खा ता २

15

कौ सि ५४ २५

पघंसलं जिह्वामूलीयस्सन वायार्ः शरिपरे विसर्जनीय एव वास्यात् हरिः शेते हरिश्शेते रवपि
रेणरिवा विसर्गलोपो वक्तव्यः रामस्थाता हरिस्फुरति पक्षे विसर्गसिद्ध्यत्रेति कुप्वोः ꣵक ꣵपौ
चे कः करोति कꣵकरोति कः खनति कꣵखनति कः पचति कꣵपचति कः फलति कꣵफलति सोऽ
पदादौ विसर्जनीयस्य सः स्यात् पदाद्योः कुप्वोः पाशकल्पककाम्येषु इति वाच्यम् पयस्पाशं पय
स्कल्पम् पयस्कं पयस्काम्यति इणः षः इणः परस्य विसर्जनीयस्य षः स्यात्पूर्वविषये सर्पि
ष्पाशं सर्पिष्कल्पं सर्पिष्कं सर्पिष्काम्यति नमस्पुरसोर्गत्योः गतिसंज्ञकयोरनयोर्विसर्गस्य
सः स्यात् कुप्वोः परयोः नमस्करोति साक्षात्प्रभृतिषु चात् कृञो योगे विभाषा गतिसंज्ञा तदभावे
नमः करोति पुरोऽव्ययमिति नित्यं गतिसंज्ञा पुरस्करोति अगतित्वान्नेह पूः पुरौ पुरः प्रकृष्टाः
इदुदुपधस्य चाप्रत्ययस्य इकारोकारोपधस्याप्रत्ययस्य विसर्गस्य षः स्यात् कुप्वोः निष्प्रत्यूहं आविष्कृ

रस्यरुः स्यादाम्रेडिते परे संपुंकानामिति सुः यद्वा कस्कादित्वं एखिणा उत्तरस्य विसर्गस्य सः स्याद
न्यत्र तु सः ॥ क ॥ पयोरपवादः इति सः कास्कान् कांस्कान् कस्कः कौतस्कुतः सर्पिष्कुण्डिका धनु
ष्कपालं आकृतिगणोयम् संहितायामित्यधिकृत्य छे च ह्रस्वस्य छे परे तु गागमः स्यात् संहिता
याम् चुत्वस्यासिद्धत्वाज्जत्वेन दः ततश्चुत्वस्यासिद्धत्वात् पूर्वं चुत्वेन जः तस्य चर्त्वेन चः चुत्वस्या
सिद्धत्वा झलो कुरिति कुत्वं न स्वच्छा शिवच्छा शिवेच्छा यो आङ्माङोश्च एतयोः छे तु कपदा
न्ताद्वेति विकल्पापवादः आच्छादयति माच्छिदत् दीर्घात् दीर्घाच्छे परे तु क स्यात् दीर्घस्यापि तु
क् न तु क्ष्स्य सेना सुराच्छायेति ज्ञापकात् चेच्छिद्यते पदान्ताद्वा दीर्घात्पदान्तात् छे परे तु वा स्यात्
लक्ष्मीच्छाया लक्ष्मीछाया ॥ इति हल्सन्धिः ॥ विसर्जनीयस्य सः विष्णुस्त्राता पापरे विसर्जनी
यः पापरे खरि विसर्जनीयस्य विसर्जनीयो न त्वन्यत् कः त्सरुः घनाघनः क्षोभणः इत्यथा

16

राम

स्कारः अयस्कामः अयस्कंसः अयस्कुंभः अयस्पात्रम् अयसहिताकुशा अयस्कुशा अयस्क
र्णी अतः किं गीः कारः अनव्ययस्य किं स्वःकामः समासे किं यशः करोति अनुत्तरपदस्थस्य किं
परमयशःकारः अधः शिरसी पदे एतयोर्विसर्गस्य सादेशः स्यात् पदशब्दे परे अधस्पदं शिरस्पदं
समासइत्येव अधः पदं शिरः पदं अनुत्तरपदस्थस्येत्येव परमशिरःपदं कस्कादिषु च भा
स्करः इतिविसर्गसन्धिः ४ स्वौजसमौडितिसुप्रत्ययेषु पावसंसृर्च्यइतिस्थिते ससजुषोरुः
पदान्तस्य सस्य सजुषश्च रुः स्यात् जस्त्वापवादः अतोरोरप्लुतादप्लुते अप्लुतादतः
परस्य रोरुः स्यादप्लुते ऽति भो भगो इति प्राप्तस्य यत्वस्यापवादः उत्वं प्रति रुत्वस्यासिद्धत्वन्तु न
भवति रुत्वमनूद्य उत्वविधेः सामर्थ्यात् प्रथमयोः पूर्वसवर्णः अकः प्रथमाद्वितीययोर
चि परे पूर्वसवर्णदीर्घ एकादेशः स्यात् इति प्राप्ते नादिचि अवर्णादिचि पूर्वसवर्णदी
र्घो न स्यात् अद्गुणः एङः पदान्तादति शिवोऽर्च्यः अत इति तपरः किं देवाश्च [illegible] अत्र अतीति ते

तं अप्रत्ययस्य किं अग्निः करोति वायुः करोति एकादेशशास्त्रनिमित्तकस्य न षत्वं कस्कादि
षु च भ्रातुष्पुत्रस्य पाठात् तेनेह न मातुः कृपा मातुष्कृपा मुहुसः प्रतिषेधः मुहुः कामयति ति
रसोऽन्यतरस्यां सो वा स्यात् कुप्वोः तिरस्कर्त्ता तिरः कर्त्ता द्विस्त्रिश्चतुरिति कृत्वोऽर्थे कृत्वोऽर्थे वर्त्तमा
नानामेषां विसर्गस्य षकारो वा स्यात् कुप्वोः द्विष्करोति द्विः करोति इत्यादि कृत्वोऽर्थे किं चतुष्क
पालः इसुसोः सामर्थ्ये एतयोर्विसर्गस्य षः स्याद्वा कुप्वोः सर्पिष्करोति सर्पिः करोति धनुष्करोति
धनुः करोति सामर्थ्यमिह व्यपेक्षा सामर्थ्ये किं तिष्ठतु सर्पिः पिव त्वमुदकं नित्यं समासेऽनुत्तरपद
स्थस्य इसुसोर्विसर्गस्यानुत्तरपदस्थस्य समासे नित्यं षः स्यात् कुप्वोः परयोः सर्पिष्कुण्डिका अनुत्त
रपदस्थस्य किं परमसर्पिः कुण्डिका कस्कादिषु सर्पिष्कुण्डिकाशब्दोऽसमासे व्यपेक्षाविरहे पिव
त्वार्थः व्यपेक्षायां नित्यापेक्षत्वात् अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य अकारादु
रस्यानव्ययस्य विसर्गस्य समासे नित्यं सकारादेशः स्यात् करोत्यादिषु परे न तूत्तरपदस्थस्य अय

कौ०सि०
१७

व्योर्लघुप्रयत्नतरः शाकटायनस्य

धित्वंस लघूच्चारणौ॥ भोभगो अघोअपूर्वस्य योशि॥ ओतोगार्ग्यस्य ओकारात्परस्य पदांतस्य लघुप्रयत्नस्य यकारस्य नित्यं लोपः स्यात् गार्ग्यग्रहणं पूजार्थं भोअच्युत लघुप्रयत्नपक्षे भोयच्युत पदांतस्य किं तोयम् उञि च
पदे अवर्णपूर्वयोः पदांतयोर्यवयोर्लोपः उञि पदे स उ एकाग्निः पदे किं तन्वयुत वेञः संप्रसारणं रूपं यत् तु प्रतिपदोक्तो निपात उञिति गृह्यत इति तद्युक्तार्थं पदग्रहणम् हलि सर्वेषां भोभगोअघोअपूर्वस्य लघुलघूच्चारणस्य यकारस्य लोपः स्याद्धलि सर्वेषां मतेन भोदेवाः भो लक्ष्मि भो विद्वद्वृन्द भगोनमस्ते अघोयाहि देवानम्याः देवायांति हलि किं देवायिह रोसु पि अहोरेफादेशः स्यान्न तु सुपि रोरपवादः अहरहः अहर्गणः असुपि किं अहोभ्याम् अत्राहन्निति लत्वं रूपरात्रिरथंतरेषु रुत्वं वाच्यं अहोरूपं गतमहो रात्रिरेषा एकदेशविकृतस्यानन्यत्वा त् अहोरात्रः अहोरथंतरं अहरादीनां पत्यादिषु वारेफः विसर्गापवादः अहर्पतिः गीर्पतिः

ऊर्ध्वतिर्यु
धोरोहलो
प्रतिपदोक्ते

ग्रहो च रूपरा

रथ्रपथ मा

परः किं स्वञ्जागंता अप्लुतात्किं एहि सख्यो ३ त्र स्नाहि प्लुतस्यासिद्धत्वादतः परोयम् अप्लु
ता इति विशेषणेनतु तत्सामर्थ्यान्नासिद्धत्वं तपरकारस्य तु नसामर्थ्यं दीर्घनिवृत्त्यर्थं चरितार्थत्वात्
अप्लुतेऽर्द्धेति किं तिष्ठतु पय आ ३ ग्निदत्त गुरोरनृत इत्प्लुतः हशि च अप्लुतादतः परस्य रोरुत्स्या
द्धशि शिवो वंद्यः रोरित्युकारानुबंधग्रहणान्नेह प्रातरत्र धातर्गच्छ देवास इह इति स्थिते रु
त्वं भो भगो अघो अपूर्वस्य योऽशि एतत्पूर्वस्य रोर्यो देशः स्यादशि परे असंधिः सौत्रः लोपः शाक
ल्यस्य देवा इह देवायिह अशि किं देवाः संति यद्यपीह यत्वस्यासिद्धत्वाद्विसर्गो लभ्यते तथा
पि विसर्गस्य स्थानिवद्भावेन रुत्व यत्वं स्यात् न ह्ययमल्विधिः रोरिति समुदायाश्रयणात् भोस् भगो
स् अघोस् इति सकारांता निपाताः तेषां रोर्यत्वे कृते व्योर्लघुप्रयत्नतरः शाकटायनस्य पदांत
योर्वकारयकारयोर्लघूच्चारणौ वयौ वा स्तः यस्योच्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शै

रत्तस्य नः स्यात् तुसि अट्कुप्वाङ्नुम्व्यवायेऽपि अट् कवर्ग पवर्ग आङ् नुम् एतैर्व्यस्तैर्यथासंभवं मिलि
तैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात् समानपदे पदव्यवायेऽपीति निषेधं बाधितुमाङ्ग्रहणं
नुमग्रहणमनुस्वारोपलक्षणार्थं तच्चाकृतणत्वं अयोगवाहानामट्सूपदेशस्योक्तत्वात् इति णत्वे
प्राप्ते पदान्तस्य पदान्तस्य णत्वं न स्यात् रामान् यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गं यः प्रत्ययो य
स्मात्क्रियते तदादिशब्दस्वरूपं तस्मिन्प्रत्यये परेऽङ्गसंज्ञं स्यात् भवामि भविष्यामीत्यादौ विकरणविशि
ष्टस्याङ्गसंज्ञार्थं तदादिग्रहणं विधिरिति किं स्त्री इयती प्रत्यये किं प्रत्ययविधावुक्तस्य ततोऽप्यधि
कस्य वा मा भूत् अङ्गस्येत्यधिकृत्य टाङसिङसामिनात्स्याः अकारान्तादङ्गाट्टादीनां क्रमादिनाद
य आदेशाः स्युः णत्वं रामेण सुपि च यञादौ सुपि परे अतोऽङ्गस्य दीर्घः स्यात् रामाभ्यां अतो भिस ऐ
स् अकारान्तादङ्गात् भिस ऐस् स्यात् अनेकाल्त्वात्सर्वादेशः रामैः ङेर्यः अतोऽङ्गात्परस्य ङे इत्य
स्य यादेशः स्यात् रामाय इह स्थानिवद्भावेन यादेशस्य सुप्त्वात् सुपि चेति दीर्घः सन्निपातलक्षण

पमाङ्गसा सधते सतं स्थलिसन्निपातः

रूपाणामेकशेष एकविभक्तौ एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते प्रथमयोः पूर्व
सवर्णः नादिचि वृद्धिरेचि रामौ चुटू प्रत्ययाद्यौ चुटू इतौ स्तः इति जस्य इत्संज्ञा न विभक्तौ तुस्माः वि
भक्तिस्थास्तवर्गसकारमकारा इतो न स्युः इति सकारस्य नेत्वं अतो गुणे अपदान्तादकाराद्गुणे परतः पररू
पमेकादेशः स्यात् इति प्राप्ते परत्वात्पूर्वसवर्णदीर्घः अतो गुणे इति हि पुरस्तादपवादा अनन्तरान्विधी
न्बाधन्ते नोत्तरानिति न्यायेनाकः सवर्णे दीर्घः इत्यस्यैवापवादो न तु प्रथमयोरित्यस्य रामाः एकवच
नं सम्बुद्धिः सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञं स्यात् एङ्ह्रस्वात्सम्बुद्धेः एङन्ताद्ध्रस्वान्ताच्च
हल्लुप्यते सम्बुद्धेश्चेत् सम्बुद्ध्याक्षिप्तस्यागस्यैङ्ह्रस्वाभ्यां विशेषणान्नेह हे कतरत्कुलेति हे राम हे रामौ
हे रामाः एङ्ग्रहणं किं हे हरे हे विष्णो अत्र हि परत्वान्नित्यत्वाच्च सम्बुद्धिगुणे कृते ह्रस्वात्परत्वं नास्ति
अमि पूर्वः अकोम्यचि परतः पूर्वरूपमेकादेशः स्यात् रामम् रामौ लशक्वतद्धिते तद्धितवर्ज्जप्रत्यया
द्याल शकवर्गा इतः स्युः इति शसः शस्येत्संज्ञा तस्माच्छसो नः पुंसि पूर्वसवर्णदीर्घात्परो यः शसः सका

परश्च आद्युदात्तश्च ङ्याप्प्रातिपदिकात् इत्यादावेतत्
प्रातिपदिकाद्वेत्यापंचमसमाप्तेरधिकारः ३
सोहमाजन्मशुद्धानां ॥ इति स्वादिसन्धिः ॥ अर्थवदधातुरप्रत्ययः प्रातिपदिकं धातुं प्रत्ययं प्र
त्ययान्तं च वर्जयित्वा अर्थवच्छब्दरूपं प्रातिपदिकसंज्ञं स्यात् कृत्तद्धितसमासाश्च कृत्तद्धितान्तो समास
श्च प्रातिपदिकसंज्ञाः स्युः पूर्वेण सिद्धे समासग्रहणं नियमार्थं यत्र संघाते पूर्वो भागः पदं तद्
वति समासस्यैवेति तेन वाक्यस्य न प्रत्ययः आपंचमपरिसमाप्तेरधिकारः प्रातिपदिकग्रहणे लिं
गविशिष्टस्यापि ग्रहणमित्येव सिद्धे ङ्याप्ग्रहणं ङ्यावन्तो तद्धितात्यार्थं स्यात् ङ्याम्प्राम
भृदित्येवमर्थं स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् इत
दावेतात् प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः सुङस्योत्तकारे कारोजसष्टङ्याश्चेतः विभक्तिश्च
सुप्तिङौ विभक्तिसंज्ञौ स्तः तत्र स्वौजसित्यादीनां सप्तानां त्रिकाणां प्रथमादयः सप्तम्यन्ताः प्राचां संज्ञास्ता
भिरिह व्यवहारः सुपः सुपस्त्रीणि त्रीणि वचनानि एकशः एकवचनद्विवचनबहुवचनसंज्ञानि स्युः द्व्येक
योर्द्विवचनैकवचने द्वित्वैकत्वयोरेते स्तः बहुषु बहुवचनं बहुत्वे एतत् स्यात् रुत्वविसर्गौ रामः स

पृ २

१०

धूर्य्यतीति॥ पक्षे विसर्गोपध्मानीयौ रो रि रेफस्य रेफे परे लोपः स्यात् ढ्रलोपे पूर्वस्य दीर्घोऽणः ढरेफौ लो
पयतीति ढ्रलोपस्तस्मिन् रेफे परे निमित्ते ढकाररेफात्मके परे पूर्वस्याणो दीर्घः स्यात् पुनारमते हरीरम्यः शम्भू
राजते अणः किं तृढः वृढः तृहू हिंसायां वृहू उद्यमने पूर्वग्रहणमनुत्तरपदेपि पूर्वमात्रस्य दीर्घार्थं
अजर्घाः लीढः मनस्‌रथ इत्यत्र रुत्वे कृते हशि चेत्युत्वे रोरीति लोपे च प्राप्ते विप्रतिषेधे परं कार्यं तुल्य
बलविरोधे परं कार्यं स्यात् इति लोपे प्राप्ते पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वादुत्वमेव मनोरथः एतत्त
दोः सुलोपोकोरनञ्समासे हलि अककारयोरेतत्तदोर्यः सुस्तस्य लोपः स्याद्धलि न तु नञ्समासे एष वि
ष्णुः स शम्भुः अकोः किं एषको रुद्रः अनञ्समासे किं असः शिवः हलि किं एषोऽत्र सोचि लोपे चेत्पादपू
रणम् स इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्य्येत सेमामविड्ढि प्रभृतिं इइस्चक पादएवग्रह्य
ते इति वामनः अविशेषात् श्लोकपादेपीत्यपरे सैषदाशरथी रामः लोपश्चेदिति किं स इते द्रोति सएव
मुक्तौ सत्येवेत्यवधारणान्तु स्याच्छन्दसि बहुलमिति पूर्वसूत्राद्बहुलग्रहणादनुवृत्त्यालभ्यते तेनेहन

कौं० सि० २०

रस्यमूर्द्धन्यादेशः स्यात् विवृत्ताघोषस्य सस्य तादृश एव षः रामेषु इणकोः किं रामस्य आदेशप्रत्यययोः किं
सुपीः सुपिसौ अपदांतस्य किं हरिस्तत्र एवं कृष्णमुकुंदादयः सर्वादीनि सर्वनामानि सर्वादीनि शब्द
स्वरूपाणि सर्वनामसंज्ञानि स्युः तदंतस्यापीयं संज्ञा द्वंद्वे चेति ज्ञापकात् तेन परमसर्वत्रेति त्रल् परमभव
कानीत्यत्राकच्च सिध्यति जसः शी अदंतात्सर्वनाम्नः परस्य जसः शीः स्यात् अनेकाल्त्वात्सर्वादेशः
न्यायेनास्त इत्यादाववनानुवंधकृतमनेकाल्त्वमिति वाच्यं सर्वादेशत्वात् ङागित्संज्ञाया एवाभा
वात् सर्वे सर्वनाम्नः स्मै अतः सर्वनाम्नो ङे इत्येतस्य स्मै स्यात् सर्वस्मै ङसिङ्योः स्मात्स्मिनौ अतः सर्व
नाम्न एतयोरेतौ स्तः सर्वस्मात् आमि सर्वनाम्नः सुट् अवर्णान्तात्सर्वनाम्नो विहितस्यामः सुडागमः स्या
त् एत्वषत्वे सर्वेषां सर्वस्मिन् शेषं रामवत् एवं विश्वादयोप्यदंताः सर्वादयश्च पञ्चत्रिंशत् सर्व वि
श्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम पूर्वपरावरदक्षिणोत्तरापराधराणि
व्यवस्थायामसंज्ञायां स्वमज्ञातिधनाख्यायां अंतरं बहिर्योगोपसंव्यानयोः त्यद् तद् यद् एतद् इदम्

बहुवच नेऽस्त्वे त इति कार

णोविधिरनिमित्तं तद्विघातस्येतिपरिभाषा तु नेह प्रवर्त्तते कष्टाय क्रमणे इति निर्देशेन तस्या अनित्य
त्वज्ञापनात् रामाभ्यां बहुवचने झल्येत् झलादौ बहुवचने सुपि परे ऽतोंगस्य एकारः स्यात् रा
मेभ्यः बहुवचने किं रामः रामस्य झलि किं रामाणां सुपि किं पचध्वे जश्त्वं वावसाने अ
वसाने झलां चरो वा स्युः रामात् रामाद् द्वित्वे रूपचतुष्टयं रामाभ्यां रामेभ्यः रामस्य सस्य द्वित्वपक्षे ख
रि चेति चर्त्वे प्राप्ते तरतमप्रत्यये न तु तकारः अल्पप्राणतया प्रयत्नभेदात् अत एव सः सीति तादेशः स्मार
र्यते ओसि च ओसि च परे ऽतोंगस्य एकारः स्यात् रामयोः ह्रस्वनद्यापो नुट् ह्रस्वान्तान्नद्यन्तादाबन्ताच्चांगा
त्परस्यामो नुडागमः स्यात् नामि नामि परे ऽजन्तांगस्य दीर्घः स्यात् रामाणां सुपि चेति दीर्घो यद्यपि परत्वात् तथापि परः
ऽन प्रवर्तते सन्निपातपरिभाषाविरोधात् नामीत्यनेन त्वारम्भसामर्थ्यात् परिभाषा बाध्यते रामे रामयोः सु
पि एत्वे अपदान्तस्य मूर्द्धन्यः आपादसमाप्तेरधिकारो ऽयम् इणकोरित्यधिकृत्य आदेशप्रत्यययोः सहेः
साड्ः स इति सस्त्राणात्स इति सप्तम्यन्तमनुवर्तते इण्कवर्गाभ्यां परस्यापदान्तस्यादेशरूपस्य प्रत्ययावयवस्य सस्य
पा० ८ २ ह्रस्वनद्यापो नुट् ... ७।१।५

रां कृतं स्मिन्निकिर्तिके अस्य तरावज्ञ मये मारीज मये देवम नुष्या इति भाष्य प्रयोगा स्तु संग
च्छे ते स्मरदत मतं चात स्म लोत तापर्द्वि जरा त स्यात तरू अ प्रथा ख्यान परभाष्य त्व चप

कौ॰ सि॰ २०

अंतरायांपुरि पूर्वपरावरदक्षिणोत्तरापराधराणिव्यवस्थायामसंज्ञायां। एतेषांव्यवस्थायांमसंज्ञायांसर्व
नामसंज्ञागणपाठात्सर्वत्रयाप्राप्तासाजसिवास्यात पूर्वे पूर्वाः स्वाभिधेयापेक्षोऽवधिनियमोव्यवस्था
२१ व्यवस्थायांकिं दक्षिणाः गाथकाः कुशलाइत्यर्थः असंज्ञायांकिं उतराकुरवः स्वमज्ञातिधनाख्यायां
ज्ञातिधनान्यवाचिनः स्वशब्दस्यप्राप्तासंज्ञाजसिवास्यात स्वे स्वाः आत्मीयाइत्यर्थः आत्मानइतिवा ज्ञाति
धनवाचिनस्तुस्वाः ज्ञातयोर्वा अंतरंवहिर्योगोपसंव्यानयोः वाह्येपरिधानीयेचार्थेअंतरशब्दस्यप्राप्तासं
ज्ञाजसिवास्यात अंतरे अंतराः वागृहावाह्याइत्यर्थः अंतरे अंतरावाशाटकाः परिधानीयाइत्यर्थः पूर्वा
सर्व॰ दिभ्योनवभ्योवा एभ्योङसिङ्योःस्मात्स्मिनौवास्तः पूर्वस्मात पूर्वात पूर्वस्मिन पूर्वे एवपरादीनांशेषंसर्वव
त एकशब्दः संख्यासंज्ञायांनित्यैकवचनांतः नवहुव्रीहौ वहुव्रीहौचिकीर्षिते सर्वनामसंज्ञानस्यात त्वकंपि
दे॰ ३ तायस्यत्वत्कपितृकः अहकंपितायस्यमत्कपितृकः इहसमासात प्रागेवप्रक्रियावाक्येसर्वनामसंज्ञानिषि
ध्यते अन्यथालौकिकेविग्रहवाक्यइवतत्राप्यकचप्रवर्त्तेत सचसमासेपिश्रूयेत अतिक्रांतोभवकंतमति

चतिके
स्यपच
तिरूप
मितादा
वत्प
संज्ञावि
रहप्रति
पादने
नोपद्गी
रावाद
स्यद्वि
वनवा
वेनकि

म् अदस एक द्वि युष्मदस्मद् भवतु किमिति उभशब्दो द्वित्वविशिष्टस्य वाचकः अतएव नित्यं द्विवच
नांतः तस्येह पाठस्तु अकच्प्रत्ययार्थः नचाकच[illegible]नेष्ट सिद्धिः द्विवचनपरत्वाभावे नो भवतः
उभयशब्द[illegible]दावि[illegible] प्रसंगात् तदुक्तं उभयो न्यत्रेति अन्यत्रेति द्विवचनपरत्वाभावे उभयश
ब्दस्य द्विवचनं नास्तीति कैयटः अस्तीति हरदत्तः तस्मात्सुप्यजादेश[illegible]स्थानिवद्भावेन तयप्प्र
त्ययांततया प्रथमचरमेति विकल्पे प्राप्ते विभक्तिनिरपेक्षत्वेनांतरंगत्वान्नित्यैव संज्ञा भवति उभये
डतरडतमौ प्रत्ययौ यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदंतग्रहणं नास्ति सुप्तिङंतमिति ज्ञापकात् तथा
पीह तदंतग्रहणं केवलयोः संज्ञायाः प्रयोजनाभावात् अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावात् द्वि
बहुविषये निर्द्धारणे वर्तेते तत्रान्यतमशब्दस्य गणे पाठाभावात् न संज्ञा त्वत्त्व इति द्वावप्यदंतौ अन्यपर्या
यो एक उदात्तो द्वयोरनुदात्त इत्येके एकस्तोत इत्यपरे नेम इत्यर्द्धे समः सर्वपर्यायः तुल्यपर्यायस्तु न
गृह्यते यथासंख्यमनुदेशः समानामिति ज्ञापकात् अंतरं बहिर्योगेति गणसूत्रे अपुरीति वक्तव्य॥र

न्तृतीयः अर्थवद्ग्रहणान्नेह पदुजातीयाय जरायां जरसन्यतरस्यां जरशब्दस्य जरसं वा स्यात् अजा
दौ विभक्तौ पदांगाधिकारे तस्य च तदंतस्य च अनेकाल्त्वात्सर्वादेशे प्राप्ते निर्दिश्यमानस्यादेशा भवंति
एकदेशविकृतस्यानन्यत्वाज्जरशब्दस्य जरस् निर्जरसौ निर्जरसः इत्यादौ नुंबाधित्वा परत्वाज्जरस् निर्जरसा२
निर्जरेण निर्जरसे निर्जरसः पक्षे हलादौ च रामवत् वृत्तिकृता तु पूर्वविप्रतिषेधेनातः कृतयोः सन्निपा
तपरिभाषया अनित्यत्वमाश्रित्य जरसि कृते निर्जरसिन निर्जरसैः इति रूपं तु निर्जरसा निर्जरसः इति
केचिदित्युक्तं तथा भिसि निर्जरसैरिति रूपांतरमुक्तं तदनुसारि भिस्थम बहुवचने निर्जरसैरित्यपि रूप
मिति स्वीकृतम् एतच्च भाष्यविरुद्धं पद्दन्नोमासहृन्निशसन्यूषन्दोषन्यकन्शकन्नुदन्नासन्शस्प्रभृ
तिषु पाददंतनासिकामासहृदयनिशासृज्यूषदोषयकृतशकृतउदकआस्य एषां पदादय आदे
शाः स्युः शसादौ वा यत्तु आसनशब्दस्य आसन्नादेश इति काशिकायामुक्तं तत्त्वामादिकं पादः पादौ पादाः
पादं पादौ पदः पादान् पादेन पदा सुडनपुंसकस्य सुडित्याहारः स्वादिपंचवचनानि सर्वनामस्था

भवकानितिवत् भाष्यकारस्तु त्वकत्पितृकोमकत्पितृक इति प्रत्युदाहृत्य कृत्वैतत्सूत्रं प्रत्याचख्यौ । यथोत्तरं मुनी
नां प्रामाण्यं संज्ञोपसर्जनीभूतास्तु न सर्वादयः महासंज्ञाकरणेन तदनुगुणानामेव गणे संनिवेशात् अतः संज्ञा
कार्यमंतर्गणकार्यं च तेषां न भवति सर्वो नाम कश्चित् तस्मै सर्वाय देहि अतिक्रांतः सर्वमतिसर्वः तस्मै अ
तिसर्वाय अतिकतरं कुलं अतितत् तृतीयासमासे अत्र सर्वनामता न स्यात् मासपूर्वाय तृतीयासमा
सार्थवाक्येऽपि न मासेन पूर्वाय द्वंद्वे च उक्तसंज्ञा न वर्णाश्रमेतराणां समुदायस्यायं निषेधो न त्ववयवा
नां न चैवं तदन्तविधिना सुट्प्रसंगः सर्वनाम्नो विहितस्याऽमः सुडिति व्याख्यातत्वात् विभाषा जसि जसाधारं
यत्कार्यं शीभावाख्यं तत्र कर्तव्ये द्वंद्वे उक्ता संज्ञा वा स्यात् वर्णाश्रमेतराः वर्णाश्रमेतरे शीभावं प्रत्येव वि
भाषेत्युक्तमतो नाकच् किंतु कप्रत्यय एव वर्णाश्रमेतरकाः प्रथमचरमतयाल्पार्धकतिपयनेमाश्च ए
ते जसः कार्यं प्रत्युक्तसंज्ञा वा स्युः प्रथमे प्रथमाः शेषं रामवत् तयः प्रत्ययः ततस्तदन्ता ग्राह्याः द्वितये द्वि
तयाः नेमे नेमाः शेषं सर्ववत् विभाषाप्रकरणे तीयस्य ङित्सूपसंख्यानं द्वितीयस्मै द्वितीयायेत्यादि ए

प्रभृति ग्रहणम् ... प्रकारार्थे ...

कौ॰सिं॰ २३

परोयेऽन तस्याकारस्य लोपो वास्यात् ङि॰ग्यो:परतः पृश्नि पृश्नीणां पदेरामवत् पद्भ्न इति सूत्रे प्रभृति ग्रहणं प्रकारार्थं तथाच श्रोङः प्रामपि दोषं भ्नादेशो भाष्ये ककुद्दोषणी इत्युदाहृतः तेन पदं विष्कराते॰ स्त्रियां स्यात् हन्मानसंमनः इत्यां संगच्छते आसन्यं प्राणमूचुरिति च आस्ये भवः आसन्यः दोषणा स्यनपुंसकत्वमप्यत एव भाष्ये तेन दोषाणि दोर्निमात्र रड इति संगच्छते भुजवाहू प्रवेष्टो दोरिति समाह त्वयोत पुस्त्वमपि दोषं तस्य तथाविधस्य भजतेइति द्वयोरन्हो भैवो द्वन्द्वः संख्याविसायपूर्वस्याहन्यस्य तरस्याङि सख्यादि पूर्वस्याहनादेशो वास्यान्ङे॰ द्वन्हि द्व्यहनि विगतमहः व्यन्हः व्यन्हि व्यहनि व्यह्ने अन्हः सायान्हः सायान्हि सायाहनि सायान्हे इत्यदन्ताः विश्वपाः दीर्घाज्जसि च दीर्घाज्जसि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात् वृद्धिः विश्वपौ सवर्णदीर्घः विश्वपाः यद्यपीह औङि नादिचीत्येव सिद्धं जसि तु त्वपि पूर्वसवर्णदीर्घे हति नास्ति तथापि गौर्यौ गौर्यः इत्यादौ पूर्वसूत्रमिहापि न्याप्पत्वाद् प्रवृत्यर्थं आतो धातोः आकारान्तो यो धातुस्तदन्तस्य भे

नसंज्ञानि स्युः स्त्रीवत्स्यु स्वादिष्वसर्वनामस्थाने । कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पू
र्वं पदसंज्ञं स्यात् । यचि भम् । यकारादिष्वजादिषु च स्वादिष्वसर्वनामस्थानेषु पूर्वं भसंज्ञं स्यात् । आ
कडारादेका संज्ञा । इतऊर्ध्वं कडाराः कर्मधारय इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया या परानवकाशा च तेन मासा
दावचि भसंज्ञैव न पदसंज्ञा । अतो जश्त्वं न । दंतान् दतः दता जश्त्वं दद्भ्यां । मासः मासा भ्यामिति तु रुत्वे यत्वे च
यलोपः माभ्यां माभिः भस्येत्यधिकृत्य अल्लोपोऽनः । अंगावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् त
स्याकारस्य लोपः स्यात् । रषाभ्यां नो णः समानपदे । एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्यात् । पूषा
न् पूष्णः पूष्णा पूर्वस्मादपि विधौ स्थानिवद्भाव इति पक्षे तु अट्कुप्वाङ्नुम्व्यवाय इत्येवानेन णत्वं पूर्वत्रासिद्धे न स्था
निवदिति तु इह नास्ति तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति निषेधात् । नलोपः प्रातिपदिकान्तस्य । ने
ति प्रातिपदिकेति च लुप्तषष्ठीके पदे प्रातिपदिकसंज्ञकं यत्पदं तदंतस्य नकारस्य लोपः स्यात् । नलोपस्यार
सिद्धत्वात् दीर्घत्वमेत्वमे[illegible]न पूषभिः पूषभ्यः इत्यादि । विभाषा ङिश्योः । अंगावयवोऽसर्वनामस्थान

सखि संबुद्धि ओ ३ ज

कौं॰सिं॰ २४ ङसिङसोरति परे पूर्वरूपमेकादेशः स्यात् हरेः हर्योः हरीणां अच्च घेः इदुद्भ्यामुत्तरस्य ङेरौत्स्या
त् घेरंतादेशश्चाकारः हरौ हरिषु एवं श्रीपत्यग्निरविकव्यादयः अनङ् सौ सख्युरंगस्यानङ् स्यादसंबुद्धौ
सौ परे ङिच्चेत्यंतादेशः अलोऽन्त्यात्पूर्व उपधा अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात् सर्वनामस्थाने
प चासंबुद्धौ नांतस्योपधाया दीर्घः स्यात् असंबुद्धौ सर्वनामस्थाने परे अपृक्त एकाल्प्रत्ययः एकाल्प्रत्ययो
यः सोऽपृक्तसंज्ञः स्यात् हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् हलंतात्परं दीर्घौ ङ्यापौ तदंताच्च परं सु ति
सी त्येतदपृक्तं हल् लुप्यते हल्ङ्याब्भ्यः किं ग्रामणीः दीर्घात् किं निष्कौशाम्बिः अतिखट्वः सुतिसीति
किं अभैत्सीत् तिपा सह चरितस्य ग्रहणात् सिपो ग्रहणं नास्ति अपृक्तं किं बिभर्ति हल् किं बि
द प्रथमहल् किं राजा नलोपो न स्यात् संयोगांतस्य लोपस्यासिद्धत्वात् सखा हे सखे सख्युरसंबुद्धौ २
सख्युरंगात्परं संबुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात् अचो ञ्णिति ञिति णिति च परे अजंतांगस्य वृद्धिः
स्यात् सखायौ सखायः सखायं सखायौ सखीन् घिसंज्ञाभावान्न तत्कार्यं सख्या सख्ये ख्यत्यात्

गो।

स्यंगस्यलोपः स्यात् अलोंत्यस्य विश्वपः विश्वपा विश्वपाभ्यां एवं शंखध्मादयः धातोः किं हाहा
न् टा सवर्णदीर्घः हाहा ङे वृद्धिः हाहै ङसि ङस सदीर्घः हाहाः ओसि वृद्धिः हाहौः ङे [illegible] आदु
णः हाहे शेषं विश्वपावत् आत इति योगविभागाद् धातोरप्यालोपः क्वचित् त्वं क्वः प्रः आदंताः
हरिः प्रथमयोः पूर्वसवर्णः हरी जसि च ह्रस्वांतस्यांगस्य गुणः स्याज्जसि परे हरयः ह्रस्वस्य गु
णः ह्रस्वस्य गुणः स्यात् संबुद्धौ एङ् ह्रस्वादिति संबुद्धिलोपः हे हरे हरिं हरी हरीन् शेषो घ्यसखि अ
नदीसंज्ञौ ह्रस्वौ याविवर्णौ वर्णौ तदंतं सखिवर्जं घिसंज्ञं स्यात् शेषः किं मते एकसंज्ञाधिकारा
त्सिद्धे शेषग्रहणं स्पष्टार्थं ह्रस्वौ किं वातप्रम्ये यू किं माने आङो नास्त्रियां घेः परस्याङो नास्याद्
स्त्रियाम् आङिति टासंज्ञा प्राचां हरिणा अस्त्रियां किं मत्या घेर्ङिति घिसंज्ञस्य ङिति सुपि गुणः
स्यात् हरये घेः किं सख्ये ङिति किं हरिभ्यां सुपि किं पट्वी घेर्ङितीति गुणे कृते ङसिङसोश्च ए

२५

कौ॰शं॰ ३॥ ह्नैः कृतं प्रत्ययादर्शनं क्रमात् तत्संज्ञाः स्युः षड्भ्यो लुक् षड्भ्यः परयोर्जस्शसोर्लुक् स्यात् प्रत्ययलो
पे प्रत्ययलक्षणं प्रत्ययलुप्ते पि तदाश्रितं कार्यं स्यात् इति जसि चेति गुणे प्राप्ते न लुमतांगस्य लुक्
श्लुलुप एते लुमंतः लुमता शब्देन लुप्ते तन्निमित्तमंगकार्यं न स्यात् कति कति भिः कतिभ्यः कतीनां क
तिषु अस्मद्युष्मदष्टसंज्ञास्त्रिषु सरूपाः ॥ त्रिणच्चो बहुवचनांतः त्रयः त्रीन् त्रिभिः त्रिभ्यः त्रय
यः त्रिणाद्यस्य त्रय आदेशः स्यादामि त्रयाणां गौणत्वे तु नेति केचित् प्रियत्रीणां वस्तुतस्तु प्रियत्रया
णाम् त्रिषु द्विणच्चो द्विवचनांतः त्यदादीनामः एषामकारोंत्यादेशः स्यात् द्विभक्तौ द्विपर्यंतानामेवे
ष्टिः द्वौ द्वाभ्यां द्वयोः द्विपर्यंतानां किं भवान् भवंतौ संज्ञायामुपसर्जनत्वे च नात्वं सर्वादिगणे
कार्यत्वात् द्विनामक ष्वित् द्विः द्वौ द्वयः द्वाविति क्रांतोऽस्ति द्विः हरिवत् प्राधान्ये तु परमद्वौ इ
त्यादि औडुलोमिः औडुलोमी उडुलोमाः लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः बाह्वादीनामपवादः
औडुलोमिं औडुलोमी उडुलोमान् इत्यादि ततः वातप्रमीरित्युणादिसूत्रेण माङ ईप्रत्ययः कित् वा

रस्येति खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उत्स्यात् सख्युः औत् इदु
द्भ्यां परस्य ङेरौत्स्यात् उकारानुवृत्तिरुत्तरार्थं सख्यौ शेषं हरिवत् शोभनः सखा सुसखा सुसखा
यौ सुसखायः अनङ्णिद्वद्वयोरंगत्वात् तदन्तेऽपि प्रवृत्तिः समुदायस्य सखिरूपत्वाभावेनासखी
ति निषेधाप्रवृत्तेर्घिसंज्ञा सुसखिना सुसखये ङसिङसोर्गुणे कृते कृतयणादेशत्वाभावात् खत्या
दित्युत्वं न सुसखेः सुसखौ विस्पष्टादि एवमतिशायितः स[illegible]इति सखा परमः सखा यस्येति विग्रहे परमस
खायावित्यादि गौणत्वेऽप्यनङ्णित्वे प्रवर्तेते सखीमतिक्रान्तोऽतिसखिः लिंगविशिष्टपरिभाषया अनि
त्यत्वान्न टच् हरिवत् ह्रस्वानङ्णित्वेन भवतः गोस्त्रियोरिति ह्रस्वेन सखिपदस्य लाक्षणिकत्वात् लक्ष
णप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणात् पतिः समास एव पतिशब्दः समास एव घिसंज्ञः स्यात् प
त्या पत्ये पत्युः पत्यौ शेषं हरिवत् समासात् भूपतये कतिशब्दो नित्यं बहुवचनान्तः बहुगणवतुड
ति संख्या एते संख्यासंज्ञाः स्युः डति च डत्यन्ता संख्या षट्संज्ञा स्यात् षड्भ्यो लुक् प्रत्ययस्य लुक्श्लुलुपः एतैः श

कौ॰ सि॰ २६

पः अतिलक्ष्मीः शेषं पूर्ववत् प्रेयसीवत् कुमारी मिच्छन् कुमारीवाचरन्वा ब्राह्मणः कुमारी क्यजंताद् आचारे
क्विप् तस्मात्कर्तरि क्विपि हल्ङ्यादि लोपः अचि श्नुधातुभ्रुवां य्वोरियङुवङौ श्नुप्रत्ययांतस्य इव
र्णोवर्णांत धातोर्भ्रू इत्येतस्यांगस्य इयङुवङौ स्तः अजादौ प्रत्यये परे ङिच्च इत्यंतादेशः आंतरतम्याद्
इयङ् ओरुवङ् इति इयङि प्राप्ते एरनेकाचोऽसंयोगपूर्वस्य धात्ववयवसंयोगपूर्वो न भवति
य इवर्णस्तदंतो यो धातुस्तदंतस्यानेकाचोऽङ्गस्य यण् स्यादजादौ प्रत्यये परे इति यण् कुमार्यौ कु
मार्यः हे कुमारि अमि पूर्वः सिद्ध कुमार्यं कुमार्यः कुमार्यै कुमार्याः कुमारीणां कुमार्यां सुधीः
प्रधीः प्रधी उन्नयतीत्युन्नीः धातुनासंयोगस्य विशेषणात् इह स्यादेव यण् उन्न्यौ उन्न्यः हे उन्नीः उन्न्यम्
ङेराम् नियाम् असंयोगपूर्वस्य किं नीः नियौ नियः अमि पूर्वः सिद्ध परत्वाद् इयङ् नियः ङेराम् नियाम् अ
संयोगपूर्वस्य किं सुश्रियौ यवक्रियौ गतिकारकेतरपूर्वपदस्य यण्नेष्यते शुद्धधियौ परमधियौ क
थं तर्हि दुर्धियः वृश्चिकभियेत्यादि उच्यते दुःस्थिता धीर्येषामिति विग्रहे दुःस्थस्य धी [illegible] प्रतिगति

तं प्रमिमीते वातप्रमीः दीर्घाज्जसि च वातप्रम्यौ वातप्रम्यः हे वातप्रमीः अमिपूर्वः वातप्रमीं वातप्रम्यौ
वातप्रमीन् वातप्रम्या वातप्रम्ये वातप्रम्यः वातप्रम्योः वातप्रम्यां दीर्घत्वान्नुट् ङौ तु सवर्णदीर्घः वा
तप्रमी वातप्रम्योः वातप्रमीषु एवं ययी पप्यादयः यात्यनेनेति ययीः मार्गः पाति लोकमिति पपीः
सूर्यः ययोः कित् द्वे चेति ई प्रत्ययः कित्वं तु वातप्रमीग्रहणस्यातु अमिपामिङौ च विशेषः वातप्रम्यं वात
प्रम्यः वातप्रमि एरनेकाच इति यण्न्यायमार्गोपि प्रधीवत् बह्व्यः श्रेयस्यो यस्य सः बहुश्रेयसी दीर्घङ्यन्त
ति वाद्धल्ङ्यादिना सुलोपः यूस्त्र्याख्यौ नदी ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः प्रथमलिङ्गग्रहणं च पूर्वस्या
स्य स्योपसर्जनत्वेपि नदीत्ववक्तव्यमित्यर्थः अम्बार्थनद्योर्ह्रस्वः अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात्सम्बुद्धौ
हे बहुश्रेयसि बहुश्रेयसीन् आण्नद्याः नद्यन्तात्परेषां ङितामाडागमः स्यात् आटश्च आटोचि परे वृद्धिरेका
देशः स्यात् बहुश्रेयस्यै बहुश्रेयस्याः नद्यन्तात्परत्वान्नुट् बहुश्रेयसीनां ङेराम्नद्याम्नीभ्यः नद्यन्तादावन्ता
न्नीशब्दाच्च ङेराम् स्यात् इह परत्वादाटा नुड् बाध्यते बहुश्रेयस्यां शेषमीप्रत्ययो वातप्रमीवत् अङ्यन्तत्वान्न सुलो

वात

कौं॰सि॰ 27 ष्टुः क्रोष्टुस्तृज्वत्तेन तुल्यं वर्त्तते। संबुद्धौ सर्वनामस्थाने परे क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्दः प्रयोक्तव्य इत्यर्थः
ऋतो ङि सर्वनामस्थानयोः ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यादिति प्राप्ते ऋदुशनस्पुरुदंसो
ऽनेहसां च ऋदन्तानामुशनसादीनां चानङ् स्यादसंबुद्धौ सौ परे अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृ
पोतृप्रशास्तॄणाम् अबादीनामुपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे उणादिनिः पन्न तो नृन् तृजन्ता
नां चेद्वा तित हि नप्त्रादीनामेव नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थं तेन पितृभ्रातृप्रभृतीनां न उद्गात्
पाह सा भवत्येव, समर्थस्तन्नेउद्गातार इति भाष्यप्रयोगात् क्रोष्टा क्रोष्टारौ क्रोष्टारः क्रोष्टारं क्रोष्टारौ
क्रोष्टून् विभाषा तृतीयादिष्वचि अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत् क्रोष्ट्रा क्रोष्ट्रे ऋत उत् ऋद
न्तान्ङसिङसोरति परे उकार एकादेशः स्यात् रपरत्वं रात्सस्य रेफात्संयोगात् सस्यैव लोपो नान्यस्य रे
फस्य विसर्गः क्रोष्टुः आमि परत्वात् तृज्वद्भावे प्राप्ते नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन क्रोष्टू

त्वमेवनास्ति यत्क्रियायुक्ताः प्रादयस्तंप्रत्येवगत्युपसर्गसंज्ञाः वृश्चिकपाद्भस्यवुद्धिकृतमपादानत्वंनेहवि
वक्षितं वृश्चिकसंबंधिनीभीर्वृश्चिकभीरित्युत्तरपदलोपेवा नभूसुधियोः एतयोर्यणस्यादचिसुपि सु
धियौ सुधियः सखायमिच्छतिसखीयति ततः क्विप् अल्लोपयलोपौ अल्लोपस्यस्थानिवत्वाद्यणाप्राप्ते कौ
लुप्तंनस्थानिवत् एकादेशाविकृतस्यानन्यतयानङ्गणौ सखा सखायौ हे सखीः अग्निपूर्वे रूपात्येख्य
याणाप्राप्ते ततोपिपरत्वात्सख्युरसंबुद्धावितिप्रवर्तते सखायं सखायौ शसियण् सख्यः सख्या सहस्व
नवर्तते इति सखः तमिच्छतीति सखीः सुखमिच्छतीति सुखीः सुतीः सख्यौ सुत्यौ ख्यत्यादितिदीर्घस्या
पिग्रहणादुकारः सख्युः सुख्युः सुत्युः लूनमिच्छति लूनीः क्षामं क्षामीः प्रस्तीमं प्रस्तीमीः एमोङसिङ
सोर्यण् नत्वमतयोरसिद्धत्वात् ख्यत्यादित्युत्वं लून्युः क्षाम्युः प्रस्तीम्युः शुष्कीयते शुष्कीः पक्वीः इयङ्
शुष्कियौ शुष्कियः ङसिङसोः शुष्कियः ईदंतोः शंभुर्हरिवत् एवंविष्णुवायुभान्वादयः तृजन्तो

ष्ठिकः प्रज्ञाद्यण् कारभ्वौ कारभ्वः पुनर्भूर्योगिकः पुंसि पुनर्भ्वौ वित्यादि दृग्भूकारा भूप्राद्यौ स्वयं
भूवत् इत्यूदंताः धाता हे धातः धातारौ धातारः ऋवर्णान्नस्य णत्वं वाच्यं धातॄणां एवं नप्त्रादयः
उद्गातारौ पिता व्युत्पत्तिपक्षेपिनप्त्रादिग्रहणस्य नियमार्थत्वान्न दीर्घः पितरौ पितरः पितरं पितरौ
पोमं धातृवत् एवं जामातृभ्रात्रादयः ना नरौ नरः हे नः नृयं नृइत्यस्य नामिपरे वा दीर्घः स्यात् नृणां
नृणां इत्यृदंताः कृतृ अनयोरनुकरणे प्रकृतिवदनुकरणमिति वैकल्पिकातिदेशाद्विरपरत्वं कोः कि
रौ किरः तौः तिरौ तिरः इत्यादि गिरवत् इत्वाभावपक्षे स्वरदुर्शनति ऋतोङितिचतपरकारणाद्न इङ्गु
णेन कृः क्रौ क्रः क्रौ कृन् क्रोः क्रे इत्यादि इत्यृदंताः गम्लृ शक्लृ अनयोरनुकरणे अनङ् गमाश
को गुणविषये लपरत्वं गमलौ गमलः गमलौ गम्लृन् गम्ला गम्ले ङसिङसोस्तु ऋतउदित्युत्वे संयो
गांतस्य लोपः गमुल् शकुल् इत्यादि इति लृदंताः सेः सयौ सयः स्मृतेः स्मृतयो स्मृतयः इत्येदंताः

नां क्रोष्टरि क्रोष्ट्रौ पक्षे हलादौ च पूर्ववत् ऊत्युदंताः हूहूः हूह्वौ हूह्वः हूहूं हूह्वौ हूहून् हूह्वा अति
चमूशब्दे तु नदीकार्यं विशेषः हे अतिचमु अतिचम्वौ अतिचम्वाः अतिचमूनां अतिचम्वां खलपूः
ओः सुपि धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदंतो यो धातुस्तदंतस्यानेकाचोऽङ्गस्य यण् स्यादजा
दौ सुपि गतिकारकेतरपूर्वपदस्य यण्नेष्यते खलप्वौ खलप्वः एवं सुल्वादयः अनेकाचः किं लूः लुवौ लु
वः धात्ववयवेति किं उल्लूः उल्ल्वौ असंयोगपूर्वस्य किं कटप्रुवौ कटप्रुवः गतीत्यादि किं परमलुवौ सु
पि किं लुलुवतुः स्वभूः न भूसुधियोः स्वभुवौ स्वभुवः वर्षाभ्वश्च अस्योवर्णस्य यण् स्यादचि सु
पि वर्षाभ्वौ वर्षाभ्वः दृन्भूः दृन्भूः जंबूकः फेलुकः ... दृन्भूः इत्युणादिसूत्रेण व्युत्पा
दितः दृन्भ्वौ दृन्भ्वः दृन्भ्वा दृन्भ्वो दृन्भ्वेन दृन्निति नाते हिंसार्थे अव्ययं भुवः धातोः क्विप् दृन्भूः दृन्क
र पुनः पूर्वस्य भुवो यण् वक्तव्यः दृन्भ्वौ दृन्भ्वः खलपूवत् करभूः करभ्वौ करभ्वः दीर्घपाठे करभवकारः स्वा

कौ॰ सि॰ न्नत्वाभावः रमाः आङि चापः आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात् रमया रमाभ्यां रमाभिः
याडापः आपः परस्य ङितो वचनस्य याडागमः स्यात् वृद्धिरेचि रमायै सवर्णदीर्घः रमायाः रमयोः रमाणां
रमायाम् रमयोः रमासु एवं दुर्गादयः सर्वनाम्नः स्याड्ढ्रस्वश्च आबन्तात्सर्वनाम्नः परस्य ङितः स्याडापो
ह्रस्वश्च स्यात् याटोपवादः सर्वस्यै सर्वस्याः एकदेशस्य पूर्वत्वेन ग्रहणाद् आमि सर्वनाम्नः इति सुट्
सर्वासां सर्वस्याम् सर्वयोः सर्वासु एवं विश्वादय आबन्ताः विभाषा दिक्समासे बहुव्रीहौ अत्र सर्वनामता
वा स्यात् उत्तरपूर्वस्यै उत्तरपूर्वायै दिङ्नामान्यन्तराले इति प्रतिपदोक्तस्य दिक्समासस्य ग्रहणान्नेह योत्त
रस्याः पूर्वस्या उमुग्धायास्तस्यै उत्तरपूर्वायै बहुव्रीहिग्रहणस्य बाह्यार्थं अन्तरस्यै शालायै बाह्यायै इत्यर्थः
अपुरीत्युक्तेर्नेह अन्तरायै नगर्यै विभाषा द्वितीयातृतीयाभ्याम् आभ्यां परस्य ङितः स्याडापो ह्रस्वश्च इदं ल
क्षणत्वं तु शक्यं तीयस्य ङित्सूपसंख्यानात् द्वितीयस्यै द्वितीयायै द्वितीयस्याः द्वितीयायाः द्वितीयस्यां द्वि
त

उत्तरपूर्वस्या उत्तरपूर्वायाः उत्तरपूर्वस्यां

तीया

गोतो णित् गोशब्दात्परं सर्वनामस्थानं णित्कार्यकृत्स्यात् गौः गावौ गावः औतोऽम्शसोः आ ओतः
इति छेदः ओकारादम्शसोरचि परे आकार एकादेशः स्यात् शसा साहचर्यात्सुबेवाम् गृह्यते ने
ह अचिनवं गां गावौ गाः गवे गोः इत्यादि ओतो णिदिति वाच्यं विहितविशेषणाच्च तेन सुद्योः सु
द्यावौ ओकाराद्विहितं सर्वनामस्थानमिति व्याख्यानान्नेह हे भानो भानवः उः शंभुः स्मृतो येन स
स्मृतौः स्मृतावौ स्मृतावः स्मृता इत्योदंताः इत्यादि रायो हलि रैशब्दस्याकारोऽन्तादेशः स्यात् हलि
विभक्तौ अचि आयादेशः राः रायौ रायः राया राभ्यामित्यैदंताः ग्लौः ग्लावौ ग्लावः ग्लावं ग्लावौ
ग्लावः औतोम्शसोरिति ह न प्रवर्तते ऐऔच् सूत्रेण आदौतोः साहचर्याभावज्ञापनात् इत्य
जंताः पुल्लिंगाः रमा औङ आपः आवंतादंगात्परस्यौङः शीस्यात् औङित्यौकारविभक्तेः संज्ञा र
मे रमाः संबुद्धौ च आप एकारः स्यात् संबुद्धौ एङ्ह्रस्वादिति संबुद्धिलोपः हे रमे हे रमाः रमां रमे रमाः

30 निरार्थ [illegible] निपा.पाउका तैला कौ० २

कौ०सं० रु० रमावत् निणाय निश् निशः निशो वृश्चभ्रस्जसृजमृजयजराजभ्राजछशांतः वृश्चादीनां सप्तानां छ शांतयोश्च षकारोंत्यादेशः स्यात् झलि पदांते च वृश्च्युजस्त्वेनडः निड्भ्याम् निड्भिः सुपिड्ःसीति पक्षे धुट् चत्वं स्यासिद्धत्वाच्च योर्द्वितीयाइतिटतयोर्न न पदांताट्टोरिति ष्टुत्वं न निट्त्सु निट्सु पक्षे कौ०सि यस्य ढस्य चकः स्यात्सकारे परे इति तु न भवति जस्त्वं प्रत्यसिद्धत्वात् केचित्तु वृश्चादिसू त्रेदादेर्धातोरिति सूत्राद्धातोरित्यनुवर्तयंति तन्मते जस्त्वे नञ्जकारे निज्भ्याम् निज्भिः जस्त्वं सुलेवे त्वे निच्षु चोःकुरिति कत्वं तु न भवति जस्त्वस्यासिद्धत्वात् मांसपृतनासानूनां मांस पृत् स्नवो वाच्याः मा मादौ वा पृतः पृता पृद्भ्याम् पक्षे सुङ्गिटि च रमावत् गोपाविश्वपावत् मतिः आयेएहरिवत् स्त्रीत्वानुत्व भावः मतीः नात्वं न मत्या ङितिह्रस्वश्च इयङुवङुस्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिंगावीदूतौ ह्रस्वौ च इवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे आण्नद्याः मत्यै मतये मत्याः मतेः नदीत्व पक्षे औदिति

पत्स् परि पत्ता > प्रस्जे प्रमृ वड्स्थानावत्री जिसृज मानुव ... मांसा मां ... मासाम्मान मां पृ प्रि / मानुत्वं तुरुक तैनीपमर २

तीयायां शेषंरमावत् एवंतीतीया अम्स्वार्थेनद्योर्दृस्वः हेअंव हेअक हेअह्ल असंयुक्तापेडुलकास्तद्दूतो
ह्रस्वेन हेअंवाड्डे हेअंवाले हेअविके जरा जरसौ णीभावात् परत्वाज्जरस् आमिनुटः परत्वंरिंज्जरस ज
रसामित्यादि पक्षेरमावत् इहपूर्वविप्रतिषेधेनणीभावं कृत्वासन्निपातपरिभाषाया अनित्यतां चा
श्रित्यजरसौ इतिकेचिदाहुस्तन्निर्मूलं यद्यपिजरसादेशास्यस्थानिवद्भावेनावंततामाश्रित्यञ्डोड्याप:
आङिचापः याडापःह्रस्वनद्यापः डेरामइतिपंचापिविधयः प्राप्ताएवं नसन्निपातपरिभाषया तथाप्यनित्विधावि
त्युक्तेर्नभवंति आच्चाविति प्रश्लिष्टआकाररूपस्यैवापः सर्वत्रग्रहणात् एवंहलङ्यादिसूत्रेपि आच्चा
यङीई इतिप्रश्लेषादितिस्थितं निष्कौशांबिरित्यादिसिद्धेर्दीर्घग्रहणांप्रत्याख्येयं नचैवमप्यतिखट्वोयत्
त्र्यात्स्वयमाकारत्वस्थानिवद्भावेनाप्त्वंचाश्रित्ययाट्स्यादितिवाच्यं आवंतपदंगंततःपरस्ययादिर्विधाना
त् उपसर्जनस्त्रीप्रत्ययेतदादिनियमात् यद्दाग्मितिनासिकायानस् नसः नसा नोभ्यामित्यादि पक्षेसुटिच

कौ॰सि॰ ३१ टीकार्ये हेगौरि गौर्ये एवंवाणीनद्यादयः प्रातिपदिकग्रहणे लिंगविशिष्टस्यग्रहणादनङीणादु
द्वावेचडापे विभक्तौ लिंगविशिष्टाग्रहणं सखी सख्यौ सख्यः इत्यादिगौरीवत अङ्यंतत्वान्नसुलो
पः लक्ष्मीः शेषंगौरीवत एवंतरीतंत्र्यादयः स्त्री हेस्त्रि स्त्रियौ स्त्रीशब्दस्यइयङ्स्यादजादौप्रत्यये
परे स्त्रियौ वाम्शसोः अमिपासियंस्त्रियाइयङ्स्यात स्त्रियं स्त्री स्त्रियः स्त्रीः स्त्रिया स्त्रियै स्त्रियाः
स्त्रियोः परत्वान्नुट् स्त्रीणाम स्त्रियाम स्त्रियोः स्त्रीषु स्त्रीमतिक्रांतोऽतिस्त्रिः अतिस्त्रियौ गुणाना
भावोत्वनुट्ः परत्वात्पुंसिबाध्यते ह्रीबेनुमाद्य स्त्रीशब्दस्यइयङ्त्यवधार्य्येतां जसिच अति
31 स्त्रयः हेअतिस्त्रे वाम्शसोः अतिस्त्रिं अतिस्त्रियं अतिस्त्रियौ अतिस्त्रियः अतिस्त्रीन् अतिस्त्रि
णा घेङिति अतिस्त्रये अतिस्त्रेः अतिस्त्रियोः अतिस्त्रीणां अतिस्त्रौ औत्सौकारेच नित्यस्यादम्पा
सोस्तुविभाषाया इयादेशोऽस्त्विनान्यत्र स्त्रियाः पुंस्युपसर्जने ह्रीबेतुनुम अतिस्त्रिणी अतिस्त्री

ङेरौ लेपःप्राप्ते इदुद्भ्याम् नदीसंज्ञकाभ्यामिदुद्भ्यां परस्य ङेः आम स्यात् पदे अच्चघेः मत्यां मतौ एवं श्रुतिस्मृत्या
दयः त्रिचतुरोः स्त्रियां तिसृचतसृ स्त्रीलिंगयोरेतयोरेतावादेशौ स्तो विभक्तौ परतः अचि र ऋतः तिसृचत
सृ एतयोः ऋकारस्य रेफादेशः स्यादचि गुणदीर्घोत्वानामपवादः । तिस्रः तिसृभिः तिसृभ्यः आमि नुमचिरे
तिनुट् न तिसृचतसृ एतयोर्नामि दीर्घो न स्यात् तिसृणाम तिसृषु स्त्रियामिति त्रिचतुरोर्विशेषणान्नेह प्रि
यास्त्रयः स्त्रीणां वा यस्य सः प्रियत्रिः मतिवत् आमि प्रियत्रयाणामिति विशेषः प्रियास्तिस्रो यस्य सः इति
विग्रहे तु प्रियतिसा प्रियतिस्रौ प्रियतिस्रः प्रियतिसृणाम् इत्यादि प्रियास्तिस्रो यस्य तत्कुलं प्रियत्रि
स्वमोर्लुका लुप्तत्वेन प्रत्ययलक्षणाभावान्न तिस्रादेशः न लुमतेति निषेधस्यानित्यत्वात्पक्षे प्रियतिसृ
रादेशात्पूर्वं विप्रतिषेधेन नुम् प्रियतिसृणी प्रियतिसृणि तृतीयादिषु वक्ष्यमाणपुंवद्भावविकल्पात्प
क्षे णनुमभावे प्रियतिस्रा प्रियतिसृणा द्वेरत्वम् स्यात् द्वे द्वाभ्याम् द्वयोः गौरी गौर्यौ गौर्यः न

कौ॰सि॰ ३२ मतेसुधीः श्रीवत् मतांतरे पुंवत् सुद्धधीरिति विग्रहे तु श्रीवदेव ग्रामणीः पुंवत् ग्रामनयनस्योत्सर्गतः पुंध
र्मतया पदांतरं विना स्त्रियामप्रवृत्तेः एवं खलपवनादेरपि पुंधर्मत्वमौत्सर्गिकं बोध्यम् धेनुमित्तिवत् स्त्रियां
च स्त्रीवाची क्रोष्टुशब्दस्तृजंतवद्रूपं लभते अन्येभ्योऽपीति ऋदंतेभ्यो नांतेभ्यश्च स्त्रियां ङीप् स्यात् क्रोष्ट्री
क्रोष्ट्र्यौ क्रोष्ट्र्यः वधूः गौरीवत् भूः श्रीःवत् हे सुभ्रूः कथं तर्हि हा पितः क्वासि हे सुभ्रु इति भट्टिः प्रमाद एवा
यमिति बहवः खलपूः पुंवत् पुनर्भूः दृन्करेति यणो उवङो बाधनान्नेयङ्वङ् इति निषेधो न हे पुनर्भु पुन
र्भ्वे पुनर्भ्वौ पुनर्भ्वः एकाजुत्तरपदे णः एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिप
दिकांतनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात् आरंभसामर्थ्यान्नित्यत्वे सिद्धे पुनर्णग्रहणं स्पष्टार्थं यणो वा
धित्वात्परत्वान्नुट् पुनर्भूणाम् वर्षाभूः भेकजातौ नित्यस्त्रीत्वाभावात् हे वर्षाभूः कैयटमते मतांतरे तु हे
वर्षाभु पुनर्नवायां तु हे वर्षाभु भेकी पुनर्नवायां स्त्रीव मा भूदिति दृग्भूपुमानिति यादेवः वर्षाभ्वस्त्री [illegible]

णौ अतिस्त्रिणौ ङेप्रभृतावजादौ वक्ष्यमाणपुंवद्भावात् पक्षेआग्वद्रूपं अतिस्त्रयै अतिस्त्रिणः अ
तिस्त्रेः अतिस्त्रिणोः अतिस्त्र्योरित्यादि स्त्रियांतु आयेणपुंवत् णसि अतिस्त्रीः अतिस्त्रिया ङिति
ह्रस्वश्चेति ह्रस्वांतलक्षणयुक्तो विकल्पः अस्त्रीतितु इयङ्वङ्स्थानावित्यस्यैव पर्युदासस्तत्संबद्धस्यै
वानुवृत्तेः दीर्घस्यायंनिषेधो नतु ह्रस्वस्य अतिस्त्रियै अतिस्त्रये अतिस्त्रियाः अतिस्त्रेः अतिस्त्रि
यां अतिस्त्रौ श्रीः श्रियौ श्रियः नेयङ्वङ्स्थानावस्त्री इयङ्वङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ
नस्तो नतु स्त्री हे श्रीः श्रिये श्रियै श्रियाः श्रियः वामि इयङ्वङ्स्थौ नौ स्त्र्याख्यौ आमि वा नदीसंज्ञौ स्तो
नतु स्त्री श्रीणाम् श्रियाम् प्रधीशब्दस्यतु वृत्तिकारादीनां मते लक्ष्मीवद्रूपम् पदांतरं विनापि स्त्रियां वर्त्तमा
नत्वं नित्यस्त्रीत्वमिति स्वीकारात् लिंगांतरानभिधायकत्वं तदिति कैयटमते तु पुंवद्रूपम् प्रकृष्टा धीरिति
विग्रहे लक्ष्मीवत् अमि शसि च प्रध्यं प्रध्यः इति विशेषः सुष्ठुधीर्यस्याः सुष्ठुध्यायतीति वेति विग्रहे वृत्ति

कौंसि ति हे कतरत् पुनस्तद्वत् शेषं पुंवत् कतमत् कतमद् इतरत् अन्यत् अन्यतरत् अन्यतमस्यतु अन्यतम
३३ मित्येव एकतरात्प्रतिषेधो वक्तव्यः एकतरं सोरमादेशे कृते संनिपातपरिभाषया जरसन अजरम् अ
जरसौ अजरे परत्वाज्जरसि कृते रूलंतत्वान्नुम् सांतमहतःसंयोगस्य सांतसंयोगस्य महतश्चयो न
कारस्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे अजरांसि अमिलुकोपवादम भावं बाधित्वा
परत्वाज्जरस् ततः सन्निपातपरिभाषया न लुक् अजरज्जम् अजरम् अजरसौ अजरे अजरांसि अ
जराणि शेषं पुंवत् पद्दन्निति हृदयोदकासनानां हृद उदन् आसन् हृदि हृदा हृद्भ्यामित्यादि उदानि
उद्गा उदभ्यामित्यादि आसानि आस्ना आसभ्यामित्यादि मांसि मांसा मान्भ्यामित्यादि वस्तुतस्तु प
भृतिग्रहणात् प्रकारार्थमित्युक्तम् अतएव भाष्ये मांसपच्यन्या उखायाः इत्युदाहृतं अपस्मयादिवेनमत्वा
संयोगान्तलोपेन पद्दन्नित्यत्र हृदसीत्यनुवर्तितं वृत्तौ तथापि अपाभीत्यत्र मासपक्कं हसीति वार्तिके छन्दो
ग्रहणात्सामर्थ्याल्लोके पि क्वचिदिति कैयटोक्तरीत्या प्रयोगमनुसृत्य पदादय प्रयोक्तव्या इति बोध्यम्॥

१श्रामेत्ति ह्रस्वे दो ननु स्था नमिसादो स्थानेदे धापत्तेः स्त्री पात्तपरि
भाषा पानुकिधे वारसो हस्ताने सादो संबुद्धि लोपं नापत्ते ॥४॥

वर्षाभ्वौ वर्षाभ्वः स्वयंभूः पुंवत् न षट्स्वस्रादिभ्यः षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीप्टापौ न स्तः स्व
सा तिस्रश्चतस्रश्च ननांदा दुहिता तथा याता मातेति सप्तैते स्वस्रादय उदाहृताः अप्तृन्निति दीर्घः स्वसा
स्वसारौ स्वसारः माता पितृवत् शसि मातॄः द्यौर्गोवत् राः पुंवत् नौर्ग्लौवत् इत्यजंताः स्त्रीलिंगाः ॥
अतोम् अतोंगात् क्लीबात् स्वमोरम् स्यात् अमि पूर्वः ज्ञानं एङ् ह्रस्वादिति हल्मात्रलोपः हे ज्ञान नपुं
सकाच्च क्लीबात् परस्यौङः शी स्यात् भसंज्ञायां यस्येति च भस्यावर्णोवर्णयोर्लोपः स्यात् ईकारे तद्धिते च प
रे इत्यकारलोपे प्राप्ते औङः श्यां प्रतिषेधो वाच्यः ज्ञाने जश्शसोः शिः क्लीबादनयोः शिः स्यात् शि सर्वनामस्था
नम् शि इत्येतदुक्तसंज्ञं स्यात् नपुंसकस्य झलचः झलंतस्याजंतस्य च क्लीबस्य नुमागमः स्यात् सर्वनाम
स्थाने परे उपधादीर्घः ज्ञानानि पुनस्तद्वत् शेषं रामवत् एवं धनवनादयः अद्ड्डतरादिभ्यः पंचभ्यः एभ्यः
क्लीबेभ्यः स्वमोरद्डादेशः स्यात् टेः डिति परे भस्य टेर्लोपः स्यात् वावसाने कतरत् कतरद् कतरे कतरा
णि भस्येति किं पंचमः टेलुप्तसात्प्रथमयोरिति पूर्वसवर्णदीर्घः एङ्ह्रस्वादिति संबुद्धिलोपश्च न भव

34

कौसि ३४

यां पधा पधिना मधु मधूनि हे मधो एवं मधादयः सानुशब्दस्य स्नुवा स्नूनि सानूनि प्रियक्रोष्टु प्रियक्रो
ष्टुनी तृज्वद्भावात् पूर्वविप्रतिषेधेन नुम् प्रियक्रोष्टूनि टादौ पुंवत्त्वे प्रियक्रोष्ट्रा प्रियक्रोष्टुना प्रियक्रोष्ट्रे
प्रियक्रोष्टवे अन्यत्र तृज्वद्भावात् पूर्वविप्रतिषेधेन नुमेव प्रियक्रोष्टुने नुमचिरेति नुट् प्रियक्रोष्टूनां सुलु
सुलुनी सुलूनि सुल्वा सुलुना धातृ धातृणी धातॄणि हे धातः हे धातृ धात्रा धातृणा एवं ज्ञातृकर्त्रादि
यः एङ्ह्रस्वात् पूर्वस्यादेशे ऋ आदि एकमाने युक्त्वेमुमधो एत्र इगन्तस्यात् प्रद्यु प्रद्युनी प्रद्यूनि प्रद्युनेत्यादि इकन्त
पुंवत् यदिगन्तं प्रद्यु इति तस्य भाषितपुंस्कत्वाभावात् एवमग्रेऽपि प्ररि प्ररिणी प्ररीणि प्ररिणा एकदेश
विकृतस्यानन्यत्वात् रायो हलीत्यात्वे प्राराभ्यां प्राराभिः नुमचिरेति नुट्यात्वे प्राराणामिति माधवः वस्तुतस्तु
सन्निपातपरिभाषया नुड्भावेन नामीति दीर्घत्वारंभसामर्थ्यात् परिभाषाबाधत इत्युक्तम् प्ररीणाम् सुनु सुनु
नी सुनुनेत्यादि इत्यजन्ता नपुंसकलिंगाः हो ढः हस्य ढः स्यात् झलि पदान्ते च झलां जशोऽन्ते इति सुलोपः प
दान्तत्वाद्धस्य ढः जश्त्वे चर्त्वे लिट् लिड् लिहौ लिहः लिहं लिहौ लिहः लिहा लिड्भ्यामित्यादि लिट्सु लि

न

ह्रस्वो नपुंसके प्रातिपदिकस्य क्लीबे प्रातिपदिकस्याजंतस्य ह्रस्वः स्यात् श्रीपं ज्ञानवत् श्रीपाय अत्र स
न्निपात परिभाषया आतो धातोरित्यालोपो न स्वमोर्नपुंसकात् क्लीबादंगात् स्वमोर्लुक् स्यात् वारि इको
ऽचि विभक्तौ इगंतस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ वारिणी वारीणि न लुमतेति निषेधस्यानि
त्यत्वात् पक्षे संबुद्धिनिमित्तो गुणः हे वारे हे वारि आङो ना वारिणा घेर्ङितीति गुणे प्राप्ते वृद्ध्यौत्व
त्वद्भाव गुणेभ्यो नुम् पूर्वविप्रतिषेधेन वारिणे वारिणः वारिणोः नुमचिरतिनुट् नामि इति दीर्घत्व
वारीणाम् वारिणि हलादौ हरिवत् तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य प्रवृत्तिनिमित्तैक्ये भाषि
तपुंस्कमिगंतं क्लीबं पुंवद्वा स्यात् टादावचि अनादये अनादिने इत्यादि शेषं वारिवत् पीलुर्वृक्षः तत्फ
लं पीलु तस्मै पीलुने अत्र न पुंवत् प्रवृत्तिनिमित्तभेदात् अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः एषामन
ङ् स्यात् टादावचि स चोदात्तः अल्लोपोनः दध्ना दध्ने दध्नः दध्नोः दध्नि दधनि शेषं वारिवत् एवमस्थि
सक्थ्यक्षि तदंतस्याप्यनङ् अतिदध्ना सुधि सुधीनि हे सुधे हे सुधि सुधिया सुधिना सुधीनां सुधि

35

सिं कौ
३५

मान्स्वाम् नैवाध्यते आ माम्नुमनवाध्यते सोऽपि नुम्विधिसामर्थ्याद् वसुस्रंस्विति दत्वेन संयोगांतलो
पस्यासिद्धत्वान्नलोपो न अनड्वान् अम्संबुद्धौ चतुरनडुहोरम्स्यात्संबुद्धौ आमोऽपवादः हे अनड्वन् अ
नड्वाहौ अनड्वाहः अनड्वाहं अनड्वाहौ अनडुहः अनडुहा वसुस्रंसुध्वंस्वनडुहां दः सांतवस्वंत
स्य स्रंसादेश्च दः स्यात्पदांते अनडुद्भ्यामित्यादि सांतेति किं विद्वान् पदांते इति किं स्रस्तं ध्वस्तं सहे
साडः सः साडूरूपस्य सहेः सस्य मूर्द्धन्यादेशः स्यात् तुराषाट् तुरासाहौ तुरासाहः तुराषाड्भ्यामि
त्यादि तुरं सहते इत्यर्थे छंदसि सहः इति ण्विः लोके तु सा दृश्यते क्विप् अन्येषामपीति पूर्वपदस्य दीर्घः
दिव औत् दिव् इति प्रातिपदिकस्य सौ परे अल्विधित्वेन स्थानिवत्त्वाभावाद्धल्ङ्यादिलोपो न
सुद्यौः सुदिवौ सुदिवः सुदिवं सुदिवौ दिव उत् दिवोंतादेश उकारः स्यात् पदांते सुद्युभ्यां सुद्युभिः
सुद्युषु इत्यादि चत्वारः चतुरः चतुर्भिः चतुर्भ्यः षट्चतुर्भ्यश्च षट्संज्ञकेभ्यश्चतुरश्च परस्यामो
नुडागमः स्यात् णत्वं द्वित्वं चतुर्णां रोः सुपि सप्तमीबहुवचने परे रोरेव विसर्जनीयो नान्यरेफ

सुद्यौ द्यौ
०प्रजेति ती
सुद्यौः

इत्व. दादेर्धातोर्घः उपदेशे दादेर्धातोर्हस्य घः स्यात् झलि परतः पदान्ते च उपदेशे किम् अधोगित्यत्र यथा
स्यात् दामलिहमात्मन इच्छति दामलिह्यति ततः क्विप् दामलिट् अत्र माभूत् एकाचो बशो भष् झषन्तस्य
स्ध्वोः धातोरवयवो य एकाच् झषन्तस्तदवयवस्य बशः स्थाने भष् स्यात् सकारे ध्वशब्दे परे पदान्ते च एका
चो धातोरिति समानाधिकरण्येनान्वयेतु इह न स्यात् गर्दभमाचष्टे गर्दभयति ततः क्विप् णिलोपः गर्दभ् झ
लीति निवृत्तं स्ध्वोरिति ग्रहणसामर्थ्यात् तेनेह न दुग्धं दोग्धा व्यपदेशिवद्भावेन धात्ववयवत्वादप्यभावः जश्त्व
चर्त्वे घुक् घुग् घुट् घुड् दुहौ दुहः घुग्भ्यां घुक्षु घुट्त्सु घुट्सु घुट्त्सु एवं मुहस्नुहस्निहां इग्यणः
संप्रसारणं यणः स्थाने प्रयुज्यमानो य इक् स संप्रसारणसंज्ञः स्यात् वाह ऊठ् भस्य वाहः संप्रसारणमूठ्
स्यात् संप्रसारणाच्च संप्रसारणादचि पूर्वरूपमेकादेशः स्यात् एत्येधत्यूठ्सु विश्वौहः विश्वौहेत्यादि छं
दस्येव ण्विरिति पक्षे राजंतादिश्च चतुरनडुहोरामुदात्तः अनयोराम् स्यात् सर्वनामस्थाने स चोदात्तः ॥
सावनडुहः अस्य नुम् स्यात् सौ परे आदित्यधिकारादवर्णात्परोऽयं नुम् अतो विशेषविहितेन पिनु

घुक् घुग् दुहौ दुहः जश्त्वचर्त्वे धक् नादुह मुहस्नुहस्निहां एषां हस्य वा घः स्यात् झलि पदान्ते च ४

सिं०कौ० ङेः स्मै पश्चाद्धलि लोपः अस्मै आभ्यां एभ्यः अस्मात् अस्य अनयोः एषां अस्मिन् अनयोः एषु क
३६ कारयोगे तु अयकं इमकौ इमके इमकं इमकौ इमकान् इमकेन इमकाभ्यां इमकैः इत्यादि इ
दमोन्वादेशेशनुदात्तस्तृतीयादौ अन्वादेशविशिष्टस्येदमोनुदात्तोशादेशः स्यात् तृतीयादौ अण्व
चनं साकङ्क्षार्थं द्वितीयाटौस्स्वेनः द्वितीयायां टौसोश्च परत इदमेतदोरेनादेशः स्यादन्वादेशे किंचि
त्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः यथा अनेन व्याकरणमधीतं एनं छन्दो
ध्यापयेति अनयोः पवित्रं कुलं एनयोः प्रभूतं स्वमिति एनं एनौ एनान् एनेन एनयोः गणयते
विच् सुगण् सुगणौ सुगणः सुगणट्सु सुगण्सु सुगण् सुगणौ सुगणः सुगणट्सु सुग
णसु परत्वादुपधाया दीर्घः हल्ङ्यादि लोपः ततो नलोपः राजा नङिसंबुद्ध्योः नस्य लोपो न स्यान्ङौ
संबुद्धौ च हे राजन् ङेत्युत्तरं छन्दस्युदाहरणं सुपां सुलुगिति ङेर्लुक् निमेधसामैव्योत्वत्ययेलक्षणं पर
मे व्योमन् ङावुत्तरपदे प्रतिषेधो वक्तव्यः चर्मणि तिलाश्च अस्य चर्मतिलः ब्रह्मणि निष्ठा अस्य ब्र

केनग्रचोरकामाद्येइह्यसिनेन्? षस्मादि वेणाते

खरवसा न बो र प्रियाचत्वारो गृह्यस्यादि प्रियचत्वा ।
के ति
१ अमुंक्तुरे प्रियचत्वारस्य

स्य मलं मस्यद्विलेडापे पारौद्वि अच्छिपरेयारोनद्वेस्तः चतुर्णु प्रियचत्वा: हेप्रियच्चत्वः प्रियचत्वारो
गौणत्वेतुनुट्नेष्यते प्रियचतुरां प्राधान्येस्यादेव परमचतुर्णां कमलं कमलौवाच्छाचुदाए: कमल् कम
लौ कमल: मलं कमल्तु मोनोधातौ धातोर्मस्यनःस्यात्पदांते नत्वस्यासिद्धत्वान्नलोपोन प्रशाम्यतीति प्र
शान् प्रशामौ प्रशाम: प्रशान्भ्यामित्यादि किम: क: किम: क:स्याद्विभक्तौ अकस्महितस्याप्ययमादेश:
क: कौ के कं कौ कानित्यादिसर्ववत् इदमोम: इदमोम:स्यात्सौपरे त्यदाद्यत्वापवाद: इदोयपुंसि इद
मइद:स्थानेअयुस्यात्सौपुंसि सुलोप: अयं त्यदाद्यत्वंपररूपत्वञ्च दस्य इदमोदस्यम:स्याद्विभक्तौपरे इ
मौ इमे त्यदादे:सम्बोधनंनास्तीत्युत्सर्ग: अनाप्यक: अककारस्यइदमइदोऽनस्यादापिविभक्तौपरे आ
विति टाइत्यत्र भ्यसुप: यकारेणग्रहणादाह: अनेन . हलिलोप: अककारस्येदमइदोलोप:स्यादापिहलादौप
रत: नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे आद्यंतवदेकस्मिन् एकस्मिन्क्रियमानंकार्यमादाविवां
तइवस्यात् आभ्यां नेदमदसोरको: अककारयोरिदमदसोर्भिस ऐसनस्यात् एवं एभि: अस्य नित्यत्वा

सिं कौ° ३७

एवं वृत्रहणौ वृत्रहणः। वृत्रहणं वृत्रहणौ। हो हन्तेर्ञ्णिन्नेषु। ञिति णिति प्रत्यये नकारे च परे हन्तेर्हस्य कुत्वं स्यात्। हन्तेः। उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णत्वं स्यात्। प्रहण्यात्। अत्पूर्वस्य। हन्तेरत्पूर्वस्यैव नस्य णत्वं नान्यस्य। प्रघ्नन्ति। योगविभागसामर्थ्यादनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति न्यायं बाधित्वा एकाजुत्तरे इति णत्वमपि निवर्त्यते। नकारे परे कुत्वविधिसामर्थ्यादल्लोपो न स्थानिवत्। वृत्रघ्नः। वृत्रघ्ने इत्यादि। यत्तु वृत्रघ्न इत्यादौ वैकल्पिकं णत्वं माधवेनोक्तं तद्भाष्यवार्तिकविरुद्धं। एवं शार्ङ्गिनयशस्विन्नर्यमन्पूषन्। यः शार्ङ्गिन्निति विन्प्रत्यय इन्नेनार्थकत्वेपि इनहन्नित्यत्र ग्रहणं भवत्येव। अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्तीति वचनात्। अर्यम्णि। अर्यमणि। पूष्णि पूषणि। मघवा बहुलं। मघवन्शब्दस्य वा तृ इत्यन्तादेशः स्यात्। ऋ इत्। उगिदचां सर्वनामस्थानेऽधातोः। अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात्सर्वनामस्थाने परे। उपधादीर्घः। मघवान्। इह दीर्घे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वं न स्यात्। बहुलग्रहणात्। तथा च श्वन्नुक्षन्निति निपातनान्मघवन्शब्दोऽन्नन्तः। पाच्यभाषायामपि शब्दद्वयं सिद्धमस्ति

राजन्शब्द राजा ४ ... राज ... सु ५

सनिष्ठः राजनौ राजानः राजानं राजानौ अल्लोपोनः अल्लुकं नचाल्लोपःस्थानिवत् पूर्वत्रासिद्धे तन्निषे
धात् नापिबहिरंगतयाऽसिद्धः यथोद्देशपक्षे षाष्ठीपत्तिभावाऽऽदितस्तुवस्यासिद्धतयांतरंगाभावे परि
भाषायाऽप्रवृत्तेः ज्ञ्जोज्ञः राज्ञः राज्ञा नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति सुब्विधौ स्वरविधौ संज्ञा
विधौ कृति तुग्विधौ च नलोपोऽसिद्धो नान्यत्र राजाश्व इत्यादौ इत्यसिद्धत्वाद्दीत्वमेत्वमैस्त्वं च न राजभ्यां राज
भिः राज्ञे राजभ्यां राजभ्यः राज्ञः राज्ञोः राज्ञां राज्ञि राजनि प्रतिदीव्यतीति प्रतिदिवा प्रतिदिवानौ प्रति
दिवानः अस्य भविषये अल्लोपे कृते हलि च रेफवान्तस्य धातोरुपधाया इको दीर्घः स्यात् हलि न चाल्लोपस्य स्था
निवत्त्वं दीर्घविधौ तन्निषेधात् बहिरंगपरिभाषेति न्यायेन न प्रवर्तते प्रतिदीव्नः प्रतिदीव्नेत्यादि जंयज्वा
यज्वानौ यज्वानः न संयोगाद्वमंतात् वकारमकारांतसंयोगात्परस्यानोकारस्य लोपो न स्यात् यज्वनः यज्वना
यज्वभ्यामित्यादि ब्रह्मणः ब्रह्मणा ब्रह्मभ्यामित्यादि इन्हन्पूषार्यम्णां शौ एभ्यां सावेवोपधाया दीर्घो नान्य
त्र इतिनिषेधे प्राप्ते सौ च इन्नादीनामुपधाया दीर्घः स्याद् असंबुद्धौ सौ परे वृत्रहा हे वृत्रहन् एकाजुत्तरपदेति

जाकार ज्ञकार पो... [illegible]

... ४ ... २ ... [illegible]

34

नदी ग्रन् ३

सि॰कौ॰ मस्थाने पथ्यादेरिकारस्याकारः स्यात् सर्वनामस्थाने थो न्थः पथिमथोस्थस्य न्थादेशः स्यात् सर्वनाम
३८ स्थाने पंथाः पंथानौ भस्य टेर्लोपः भसंज्ञकस्य पथ्यादेष्टेर्लोपः स्यात् पथः पथा पथिभ्यामित्यादि
एवं मंथाः ऋभुक्षाः स्त्रियां नांतलक्षणो ङीप् भस्याट्टिलोपः सुपथी सुमथी नगरी ऋनृभुक्षी से
ना आत्वं नपुंसके न भवति न लुमतेति प्रत्ययलक्षणनिषेधात् सुपथि वनं संबुद्धौ नपुंसकानां नलो
पो वा वाच्यः हे सुपथिन् हे सुपथि नलोपः सुप्स्वरेति नलोपस्यासिद्धत्वात् ह्रस्वस्य गुणो न द्विवचने भ
त्वाट्टिलोपः सुपथी शौ सर्वनामस्थानत्वात् सुपंथानि पुनरपि सुपथि सुपथी सुपंथानि सुपथा सुप
थे इत्यादि ष्णांता षट् ष्णांता नांता च संख्या षट् संज्ञा स्यात् षड्भ्यो लुक् पंच संख्याकिं विप्रुषः पामानः
एतानि सहस्राणीत्यत्र संनिपातपरिभाषया न लुक् सर्वनामस्थानसंनिपातेन कृतस्यानुमस्तद्विघातक
त्वात् पंचभिः पंचभ्यः २ षट्चतुर्भ्यश्चेति नुट् नोपधायाः नांतस्योपधाया दीर्घः स्यान्नामि नलोपः पंचा
नां पंचसु परमपंच परमपंचानां गौणत्वे तु न लुङ्नुटौ प्रियपंचा प्रियपंचानौ प्रियपंचानः प्रियपंच्ञः

प्रियपंचराः सरू

तैतत्सूत्रं ञ्युत्परख्यातमाकारे ह विजीक्षिति निःशंको मखेषु मघवानसाविति भट्टिः मघवंतौ मघवंतः हे म
वन् मघवंतौ मघवतः मघवता मघवद्भ्यामित्यादि तृत्राभावे मघवा छंदसीवनिपौ चेति वनिवंतं मघो
दात्तं छंदस्येव अंतोदात्तं तु लोकेपीति विशेषः मघवानौ मघवानः सुटि राजवत् श्वयुवमघोनामतद्धिते अ
न्नंतानां भसंज्ञानामेषामतद्धिते परे संप्रसारणं स्यात् संप्रसारणाच्च आद्गुणः मघोनः अन्नंतानां किं मघवतः
मघवता स्त्रियां मघवती अतद्धिते किं माघवनं मघोना मघवभ्यामित्यादि शुनः शुना श्वभ्यामित्यादि
युवन्शब्दस्य स्त्वेकृते नसंप्रसारणे संप्रसारणे परतः पूर्वस्य यणः संप्रसारणं न स्यात् इति यकार
स्यनेत्वं अतएव ज्ञापकादंत्यस्य यणः पूर्वं संप्रसारणं यूनः यूना युवभ्यामित्यादि अर्वा हे अर्वन् अर्व
णस्त्रसावनञः नञा रहितस्य अर्वन्नंतस्यांगस्य तृ इत्यंतादेशः स्यान्न तु सौ उगित्त्वान्नुम् अर्वंतौ अर्वंतः अर्व
ते अर्वतो अर्वतः अर्वता अर्वद्भ्यामित्यादि अनञः किं अनर्वाणौ यज्ववत् पथिमथ्यृभुक्षामात् एषा
माकारोंतादेशः स्यात्सौ परे आत्वं दिति प्रश्लेषणा शुद्धा आ एव आदेशः विधानान्नानुनासिकः इतोऽत्सर्वना

39

सिंकौ ३९ तेति प्रातिपदिकत्वात्स्वाद्यः युजेरसमासे युजेः सर्वनामस्थाने नुम् स्यादसमासे सुलोपः संयोगांतस्य
लोपः क्विन्प्रत्ययस्य कुः क्विन्प्रत्ययो यस्मात्तस्य कवर्गोन्तादेशः स्यात्पदांते नस्य कुत्वेन ङकारः युङ्
नश्चापदांतस्य झलि इति नुमोनुस्वारः परसवर्णः तस्यासिद्धत्वाच्चोः कुरिति कुत्वेन युञ्जौ युञ्जः युञ्जं युञ्जौ
युजइत्यादि असमासे किं चोः कुः चवर्गस्य कवर्गः स्याज्झलि पदांते च इति कुत्वं क्विन्प्रत्ययस्येति
कुत्वस्यासिद्धत्वात् सुयुक् सुयुग् सुयुजौ सुयुजः युजेरिति तुपाठपठितेकारविशिष्टस्यानुकरणंनति
कानिर्देशः तेनेह न युज्यते समाधत्ते इति युक् युजसमाधौ देवादिक आत्मनेपदी संयोगांतस्य लोपः खन्
खञ्जौ खञ्ज इत्यादि वृश्चेति षत्वं जश्त्वचर्त्वे राट् राड् राजौ राजः राड्भ्याम् राट्सु एवं विभ्राट् देवेट् देवे
जौ विश्वसृट् विश्वसृड् इह यजिसृज्योः कुत्वं नेति क्लीबे वक्ष्यते परिमृट् परिमृड् बलविधौ राजिसाह
चर्यात् टुभ्राजृ दीप्तौ इति फणादिरेव गृह्यते यस्तु एजृ भ्राजृ दीप्तौ इति तस्य कुत्वमेव विभ्राक् विभ्रा
ग् विभ्राग्भ्यामित्यादि परौ व्रजेः षः पदांते परौ उपपदे व्रजेः क्विप् स्याद्दीर्घश्च पदांते विषये षत्वं च परि

एवंसप्तन्नवन्दशन् अष्टन् औ विभक्तौ । अष्टन् आत्वं स्यादुक्तादौ विभक्तौ । अष्टाभ्यः औश् । कृताकारादष्टनः
परयोर्जस्शसोरौश् स्यात् अष्ट अष्ट इति वक्तव्ये कृतात्वनिर्देशो जस्शसोर्विषये आत्वं ज्ञापयति वैकल्पिकं चे
दमस्तन आत्वं अष्टनो दीर्घादिति सूत्रे दीर्घग्रहणात् ज्ञापकात् अष्टौ परमाष्टौ अष्टाभिः अष्टाभ्यः अष्टानां
अष्टासु आत्वाभावे अष्ट इत्यादि पंचवत् गौणत्वे त्वात्वाभावे राजवत् प्रियाष्टः इह पूर्वस्मादपि विधाव
लोपस्य स्थानिवद्भावान्नतुक्तं कार्यकालपक्षे वहिरंगस्य लोपस्यासिद्धत्वात् प्रियाष्टौ प्रियाष्टा इत्यादि जस्शसो
सोरनुमीयमानमात्वं प्राधान्य एव न तु गौणतायां तेन प्रियाष्टनो हलादावेव वैकल्पिकमात्वं प्रियाष्टाभ्यां
प्रियाष्टाभिः प्रियाष्टाभ्यः प्रियाष्टासु प्रियाष्टो राजवत् सर्वं हाहावत् आपरं हलि भभभावः जस्त्वत्वे भुत्
भुद् बुधौ बुधः बुधा भुद्भ्यां भुत्सु इत्यादि इः [illegible] कस्नगिदगुह्निगंयुयुजिक्रुञ्चां च एभ्यः क्विन्स्या
त् अत्रैलात्तरिकमपि किंचित्कार्यं निपातनाल्लभ्यते निरुपपदात् [illegible] क्विन् कत्नावितौ कृदतिङः स
न्निहिते धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात् वेरपृक्तस्य अपृक्तस्य वस्य लोपः स्यात् कृत्तद्धि

वैलोपः

40

सि.कौ. पर्य्यंतस्य त्व अह एतावादेशौ स्तः सौ परे यो मैलोपः आलयत्वनिमित्तेतर विभक्तौ परतो युष्मदस्मदोरंत्यस्य
५० लोपः स्यात् अतो गुणे अमिपूर्वः त्वं अहं ननु त्वं स्त्री अहं स्त्री इत्यत्र त्व अम् अह अम् इति स्थिते अमि
पूर्वत्वं परमप्यबाधित्वा अंतरंगत्वाट्टाप् प्राप्नोति सत्यं अलिंगौ युष्मदस्मदौ तेन स्त्रीत्वाभावान्न टाप् य
द्वा योष इति सप्तमीस्थानिनोऽधिकरणत्वविवक्षया तेन मपर्यंतत्वे यस्य अदपादस्य लोपः स च परो
७५ ऽप्यंतरंगे ऽतो गुणे कृते प्रवर्त्तते तेन अदंतत्वाभावान्न टाप् परमत्वं अतित्वं परमाहं अत्यहं युवावौ द्विवच पुवच्च ५
ने द्वयोरत्त्वौ युष्मदस्मदोर्मपर्यंतस्य युवावौ स्तो विभक्तौ प्रथमायाश्च द्विवचने भाषायां इह युष्मदस्म वच्च ५त
दोराकारो हलादेणः स्यात् औङ इत्येव सुवचं भाषायां किं युवं वस्त्राणि युवां आवां मपर्यंतस्य किं साकच्कस्यमा वौ ऽप्रथम
भूत् युवकां आवकां त्वया मयेत्यत्र त्यस्यापि मा भूत् युवकाभ्यां आवकाभ्यामिति च न सिध्येत् यूयव
यौ जसि स्यातां यूयं वयं परमयूयं परमवयं अतियूयं अतिवयं इह शेषे लोपः त्यलोप इति पक्षे जसः शी
प्राप्तः अंगकार्ये कृते नांगकार्यमिति न भवति ङे प्रथमयोरित्यत्र मकारांतरं प्रश्लिष्य अम् मांत एवाव शिष्यते

त्यक्त्वा सर्वं व्रजतीति परिव्राट् परिव्राजौ परिव्राजः विश्वस्य वसुराटोः विश्वशब्दस्य दीर्घः स्याद् वसौ राट्शब्दे च प
रे विश्वं वसु यस्य विश्वावसुः राडिति पदान्ते पललक्षणार्थं चलेम विवक्षितं विश्वाराट् विश्वाराड् विश्वराजौ
विश्वराजः विश्वाराड्भ्यामित्यादि स्कोः संयोगाद्योरन्ते च पदान्ते झलि च परे यः संयोग[illegible]द्यौ सकारककार
योर्लोपः स्यात् भ्रट् भ्रड् सस्य षत्वेन षः तस्य जश्त्वेन जः भ्रज्जौ भ्रज्जः ऋत्विगित्यादिना क्वतावुपपदे यजेः
क्विन् क्विन्नन्तत्वात् कुत्वं ऋत्विक् ऋत्विजौ ऋत्विजः रात्सस्येति नियमान्न संयोगान्तलोपः कर्जो कुः ऊर्क् ऊ
र्ग् ऊर्जौ ऊर्जः त्यदाद्यत्वं पररूपत्वं तदोः सः सावनन्त्ययोः त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात्
सौ स्यः त्यौ त्ये सः तौ ते परमसः परमतौ परमते द्व्यपेक्षतानामित्येव नेह त्वं न च तकारोच्चारणसामर्थ्यादि
ति वाच्यं अतित्यमिति गौणत्वेऽपि रिति तात्पर्यत्वात् संज्ञायां गौणत्वे चाप्रसक्तेन त्यद् त्यदौ त्यदः अतित्यद् अतित्यदौ अ
तित्यदः यः यौ ये एषः एतौ एते अन्वादेशे एन एनौ एनान् एनेन एनयोः ङे युष्मदस्मदोरमे युष्मदस्म
दोः परस्य ङे इत्यस्य प्रथमाद्वितीययोश्च अमादेशः स्यात् मपर्यन्तस्येत्यधिकृत्य त्वाहौ सौ युष्मदस्मदोर्मे

41

सि॰कौ॰ वयोः साम आकं आभ्यां परस्य साम आकम् अस्मात् भाविनः सुटो निवृत्त्यर्थं ससुट् निर्देशः युष्माकं अ
४१ स्माकं त्वयि मयि युवयोः आवयोः युष्मासु अस्मासु समस्यमाने द्व्येकत्ववाचिनी युष्मदस्मदी
समासार्थोऽन्यसंख्यश्चेत्तदा युवावौ त्वमावपि सुजसङेङस्सु परतस्त्वादेशाः स्युः सदैव ते त्वाहौ युव
वयौ तुभ्य मह्यौ तवममावपि २ एते परत्वाद्बाधते युवावौ विभक्त्येकके त्वमावपि प्रबाधते पूर्वविप्रति
षेधतः २ द्व्येकसंख्यः समासार्थो विकृतेऽर्थे युष्मदस्मदी तयोरैक्यकतार्थत्वान्न युवावौ त्वमौ न च ४ त्वामा
वामतिक्रान्त इति विग्रहे अतित्वं अत्यहं अतित्वां अतिमां अतियूयं अतिवयं अतित्वां अतिमाम्
अतित्वान् अतिमान् अतित्वया अतिमया अतित्वाभ्यां अतिमाभ्यां अतित्वाभिः अतिमाभिः अतितु
भ्यं अतिमह्यं अतित्वभ्यं अतिमभ्यं ङसिभ्यसोः अतित्वत् अतिमत् भ्यासि प्राग्वत् अतितव अ
तिमम अतित्वयोः अतिमयोः अतित्वाकं अतिमाकं अतित्वयि अतिमयि अतित्वासु अतिमासु युवा
मावां वा अतिक्रान्त इति विग्रहे सुजसङेजस्सु प्राग्वत् औ अम् औट् सु अतियुवां अत्यावां अतियुवा

जसः शीत्यत्र जसः स इति अश्लिष्टसौ तस्य जसः इति व्याख्यानाद्बु १

न तु विक्रियत इति व्याख्यानाद्धुं त्वमावेकवचने एकस्योक्तौ युष्मदस्मदोर्मपर्यंतस्य त्वमौ स्तो विभक्तौ
द्वितीयायां च युष्मदस्मदोराकारः स्यात् त्वां मां युवां आवां शसो न नेत्यविकृतिकं युष्मदस्मद्भ्यां पर
स्य शसो नकारः स्यात् अमोपवादः आदेः परस्य संयोगांतस्य लोपः युष्मान् अस्मान् टौस्यि अनयोरेका
रादेशः स्यात् अनादेशे अजादौ परे त्वया मया युष्मदस्मदोरनादेशे अनयोराकारः स्यात् अनादेशे हलादौ
परे युवाभ्यां आवाभ्यां युष्माभिः अस्माभिः तुभ्यमह्यौ ङयि अनयोर्मकारः स्य पर्यंतस्य तुभ्यमह्यौ स्तो
ङयि अमादेशः सेर्लोपः तुभ्यं मह्यं परमतुभ्यं परमह्यं अतितुभ्यं अतिमह्यं युवाभ्यां आवाभ्यां भ्य
सोभ्यम् भ्यसश्चभ्यम् वा आदेशः स्यात् आद्यः सेर्लोपस्यान्त्यलोपत्वादेव तत्रागवृद्धपरिभाषया एवं न
अभ्यम तु पदद्वयमपि साधुः युष्मभ्यं अस्मभ्यं एकवचनस्य च आभ्यां पञ्चम्येकवचनस्य अत् स्यात् त्व
त् मत् ङसेश्चेति सवर्णे युवाभ्यां आवाभ्यां पञ्चम्यास्तु अत् आभ्यां पंचम्या भ्यसोऽत् स्यात् युष्मत् अस्मत्
तवममौ ङसि अनयोर्मपर्यंतस्य तवममौ स्तो ङसि युष्मदस्मद्भ्यां ङसोऽस्य स्वष्टे तव मम युवयोः आ

सि॰कौ॰ श्रीशस्त्वावतु मापीह दत्तात्ते मेपि शर्म सः स्वामी ते मेपि स हरिः पातु वामपि नौ विभुः १ सुखं वां नौ ददा
५२ त्वीशः पतिर्वामपि नौ हरिः सोव्याद्वो नः शिवं वो नो दद्यात्सेव्योत्र वः स नः २ पदात्परयोः किं वाक्यादौ मा भू
त् त्वां पातु मां पातु पादादौ किं वेदैरशेषैः संवेद्योस्मान्कृष्णः सर्वदावतु स्थग्रहणाच्छ्रूयमाणविभक्ति
कयोरेव नेह इति युष्मत्पुत्रो ब्रवीति इत्यस्मत्पुत्रो ब्रवीति समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः
एकतिङ् वाक्यं तेनेह न ओदनं पच तव भविष्यति इह तु स्यादेव शालीनां ते ओदनं दास्यामीति एते वांनावा
न दय आदेशा अन्वादेशे वा वक्तव्याः अन्वादेशे तु नित्यं स्युः धाता ते भक्तोस्ति तव भक्तोस्तीति वा तस्मै ते
नम इत्यत्र न चवाहाहैवयुक्ते चादिपञ्चकयोगे नैते आदेशाः स्युः हरिस्त्वां मां च रक्षतु कथं मां वा न र
क्षेदित्यादि युक्तग्रहणात्साक्षाद्योगेयं निषेधः परं परासंबंधे तु आदेशः स्यादेव हरो हरिश्च मे स्वामी
पश्यार्थैश्चानालोचने अयादसज्ञानार्थैर्धातुभिर्योगे एते आदेशा स्युः चेतसा त्वां समीक्षते परं परासं
बंधेप्ययं निषेधः भक्तस्तव रूपं ध्यायति आलोचने तु भक्तस्त्वां पश्यति चक्षुषा सपूर्वायाः प्रथमा

उक्तविधयोः षष्ठ्यादिविशिष्टयोर्वानावि

न अत्यावान् अतियुवया अत्यावया अतियुवाभ्यां अत्यावाभ्यां अतियुवाभिः अत्यावाभिः भ्यसि
अतियुवभ्यं अत्यावभ्यं ङसिभ्यसोः अतियुवत् अत्यावत् ओसि अतियुवयोः अत्यावयोः अ
तियुवाकं अत्यावाकं अतियुवयि अत्यावयि अतियुवासु अत्यावासु युष्मान् अस्मान्वेति विग्रहे
सुजस्ङे ङस्सु प्राग्वत् ओ अम् औटृ शस् अतियुष्माम् अत्यस्माम् अतियुष्मान् अत्यस्मान् अति
यु ष्मया अत्यस्मया अतियुष्माभ्यां अत्यस्माभ्यां अतियुष्माभिः अत्यस्माभिः भ्यसि अतियुष्मभ्यं अ
त्यस्मभ्यं ङसिभ्यसोः अतियुष्मत् अत्यस्मत् ओसि अतियुष्मयोः अत्यस्मयोः अतियुष्माकं अत्य
स्माकं अतियुष्मयि अत्यस्मयि अतियुष्मासु अत्यस्मासु पदस्य पादात् अनुदात्तं सर्वमपादादा वि
त्यधिकृत्य युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वानावौ पदात्परयोरपादौ स्थितयोरनयोः षष्ठ्या
दिविशिष्टयोर्वानावित्यादेशौ स्तः स्त्रीचानुदात्तौ बहुवचनस्य वस्नसौ उक्तविधयोरनयोः षष्ठीचतुर्थ्येक
वचनांतयोस्ते मे एतौ स्तः स्त्वामौ द्वितीयायाः उक्तविधयोरनयोर्द्वितीयैकवचनांतयोस्त्वामा एतौ स्तः॥

उक्तविधयोरनयोः षष्ठ्यादिबहुवचनांतयोर्वस्नसौ
स्तः वान्नावौ रपवादः तेमयावेकवचनस्य २

मनिदितां हल उपधाया नस्य लोपः स्यात्क्ङिति। ङि॰ तिच्। उगिदचामिति नुम्। संयोगांतस्य लोपः। नुमो
नकारस्य क्विन्प्रत्ययस्येति कुत्वेन ङकारः। प्राङ्। अनुस्वारपरसवर्णौ। प्राञ्चौ प्राञ्चः प्राञ्चम् प्राञ्चौ। अचः।
लुप्तनकारस्याञ्चतेर्भस्याकारस्य लोपः स्यात्। चौ। लुप्ताकारेऽञ्चतौ परे पूर्वस्याणो दीर्घः स्यात्। प्राचः प्रा
चा प्राग्भ्यामित्यादि। प्रत्यङ्। प्रत्यञ्चौ प्रत्यञ्चः प्रत्यञ्चम् प्रत्यञ्चौ। अच इति लोपस्य विषये अंतरंगोपि
यणो न प्रवर्तते अकृतव्यूहा इति परिभाषया। प्रतीचः। प्रतीचा इत्यादि। अमुमञ्चतीति विग्रहे अद
स् अञ्च् इति स्थिते। विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये। अनयोः सर्वनाम्नश्च टेरद्रि आदेशः स्याद्वप्रत्ययांते
ऽञ्चतौ परे। अदद्रि अञ्च् इति स्थिते यण्। अदसोसेर्दादु दो मः। अदसोऽसांतस्य दात्परस्य उदूतौ स्तो दस्य म
उ इति ह्रस्वदीर्घयोः समाहारद्वंद्वः। आंतरतम्याद्ध्रस्वव्यंजनयोर्ह्रस्वो दीर्घस्य दीर्घः। अमुमुयङ्। अमुमुयञ्चौ
अमुमुयञ्चः। अमुमुयञ्चम्। अमुमुयञ्चौ। अमुमुईचः। अमुमुईचा। अमुमुयग्भ्यामित्यादि। मुत्वस्यासिद्धत्वा
न्न यण्। अंत्यबाधेंऽत्यसदेशस्येति परिभाषामाश्रित्य परस्यैव मुत्वं वदंतां मते। अदमुयङ्। अः सेः स

याविभामा विद्यमानपूर्वीप्रथमांतात्परयोरन्वादेशेप्यादेशा वास्युः भक्तस्त्वां मम्यहं तेन हरिस्त्वां त्राय
ते समं त्वा मे ति वा सामंत्रितं संबोधने या प्रथमा तदंतमामंत्रितसंज्ञं स्यात् आमंत्रितं पूर्वमविद्यमा
नवत् स्यात् अग्ने तव देवास्मान्पाहि अग्ने नय अग्न इंद्र वरुण इह युष्मदस्मदोरादेशास्तिङु
तनिघात आमंत्रितनिघातश्च न असवैद्रारुद्रदेवन इत्यत्र तु देवेत्यस्या विद्यमानवद्भावे पि ततः प्राची
नं रुद्रेत्येतदाश्रित्यादेशाः एवं इमं मे गंगे यमुने इति मे त्रेयमुने इत्यादिभ्यः प्राचीनामंत्रिता विद्यमानव
द्भावे पि मे शब्दमेवाश्रित्य सर्वेषां निघातः नामंत्रिते समानाधिकरणे सामान्यवचनं विशेष्यं समानाधि
करणे विशेषणे आमंत्रिते परे ना विद्यमानवत्स्यात् हरे दयालो नः पाहि अग्ने तेजस्विन् सुपात् सुपाद्
सुपादौ सुपादः सुपादं सुपादौ पादः पत् पाच्छब्दांतस्य यदंगं भं तदवयवस्य पादः पच्छब्दादेशः स्यात् सुपे
दः सुपदा सुपाद्भ्यामित्यादि अग्निमथ्नातीत्यग्निमत् अग्निमद् अग्निमथौ अग्निमथः अग्निमथा अ
ग्निमद्भ्यामित्यादि ऋत्विगादिसूत्रेणांचेः सुप्युपपदे क्विन् अनिदितां हल उपधायाः क्ङिति हलंतानां

44

श्री

सि०कौ त्यादि वृश्चेति भत्वं स्कोरिति सलोपः जश्त्वचर्त्वे सुवृट् सुवृड् सुवृश्चौ सुवृट्सु सुवृट्त्सु महपूजायां
६४ वर्त्तमाने पृषन्महद्बृहज्जगच्छतृवच्च एते निपात्यंते शतृवच्चैषां कार्यं स्यात् उगित्वान्नुम् सांतमहत इति दी
र्घः महान्ते पूज्यते इति महान् महांतौ महांतः हे महन् महतः महता महद्भ्यामित्यादि अत्वसंतस्य चा
धातोः अत्वंतस्योपधाया दीर्घः स्याद्धातुभिन्नासंतस्य चासंबुद्धौ सौ परे परं नित्यं च नुमं बाधित्वा वचनसाम
र्थ्याद् दीर्घः ततो नुम् धीमान् धीमंतौ धीमंतः हे धीमन् शसादौ महद्वत् धातोरप्यत्वंतस्य दीर्घः गोमं
तमिच्छति गोमानिवाचरतीति वा क्यजंतात् क्याचारक्विबंतात् कर्त्तरि क्विप् उगिदचामिति सूत्रे धात्वग्रहणान्नि
षमाद्धर्षे धातोरप्युगित्कार्यं तर्हि चेत्तरेवेति तेन स्नत् ध्वत् इत्यादौ न अधातोरिति तु अधातुभूतपूर्वस्या
पि नुमर्थं गोमान् गोमंतौ गोमंतः इत्यादि भातेर्डवतुः भवान् भवंतौ भवंतः हे भवन् शात्रंतस्य तु अत्वं
तत्वाभावात् न दीर्घः भवतीति भवन् उभे अभ्यस्तं षष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अ
भ्यस्तसंज्ञे स्तः नाभ्यस्ताच्छतुः अभ्यस्तात्परस्य शतुर्नुम् न स्यात् ददत् ददतौ ददतः जक्षित्यादयः ष

कारस्यस्थानेयस्यसः अमिरिति व्याख्यानान्यदाद्यलविषयएवमुत्वंनान्यत्रेतिपदे अदद्र्यङ् उक्तं च अ
दसोद्रेः पृथङ्मुत्वं केचिदिच्छंति लत्ववत् केचिदंत्यसदेशस्यानेत्येके ऽसेहि दृश्यते विष्वग्देवयोः किं अ
च्याचौ अंचतौ किं विष्वग्युक् वऽत्यये किं विष्वगंचनं वऽत्ययग्रहणाज्ज्ञापयति अन्यत्रधातुग्रहणेतदा
दिविधिरिति तेनायस्कारः उदङ् उदञ्चौ उदञ्चः पासादावत्वि उदञ्चत उङ्हात्परस्य लुप्तनकारस्यांचतेर्भ
स्य कारस्य ईत् स्यात् उदीचः उदीचा उदग्भ्यामित्यादि सम सम् समि वऽत्ययांते ऽंचतौ परे सम्यङ् सम्यञ्चौ सम्य
ञ्चः समीचः समीचा सहस्य सध्रिः सध्र्यङ् तिरसस्तिर्यलोपे अलुप्ताकारेंचतौ वऽत्ययांते परे तिरसस्तिर्य
देशः स्यात् तिर्यङ् तिर्यञ्चौ तिर्यञ्चः तिर्यञ्चं तिर्यञ्चौ तिरश्चः तिरश्चा तिर्यग्भ्यामित्यादि नांचेः पूजायां पूजार्थ
स्यांचतेरुपधायानेसलोपोनस्यात् अलुप्तनकारत्वान्नुम् प्राङ् प्राञ्चौ प्राञ्चः नलोपाभावादकारलोपोन प्रा
ञ्चः प्राञ्चा प्राङ्भ्यां प्राङ्क्षु प्राङ्षु एवं पूजार्थे प्रत्यङादयः क्रुंचे कौटिल्याल्पीभावयोः अस्य ऋत्विगादि
नानलोपाभावोपिनिपात्यते क्रुङ् क्रुञ्चौ क्रुञ्चः क्रुङ्भ्यामित्यादि चोकुः पयोमुक् पयोमुचौ पयोमुचः इ

सि॰कौ॰ क्विन् द्वित्वमेतो दात्तत्वं च निपात्यते कुत्वात्पूर्वं जश्त्वेन डः गः कः धृष्णोतीति दधृक् दधृग् दधृषौ दधृषः द
४५ धृग्भ्यां रत्नानि मुष्णातीति रत्नमुट् रत्नमुड् रत्नमुषौ रत्नमुषः रत्नमुड्भ्यां षड्भ्यो लुक् षट् षड् षड्भिः षड्भ्यः षट्चतु
र्भ्यश्चेति नुट् अनामिति पर्युदासान्नेह ष्टुत्वनिषेधः यरोनुनासिक इति वैकल्पिकत्वं वा प्रत्यये नित्यव
चनान्नित्यमनुनासिकः षण्णां षट्सु षट्त्सु तत्त्वविधिः परमषट् परमषण्णाम् गौणत्वे तु प्रियषषः
प्रियषषां रुत्वं प्रति षत्वस्यासिद्धत्वात् ससजुषो रिति रुत्वम् र्वोरुपधाया दीर्घ इकः रेफवान्तस्य धातोरुपधाया इको
दीर्घः स्यात् पदान्ते पिपठीः पिपठिषौ पिपठिषः पिपठीर्भ्याम् वा शरीति वा विसर्जनीयः नुम्विसर्जनीयश
र्व्यवायेपि एतैः प्रत्येकव्यवधानेपि इण्कुभ्यां परस्य सस्य मूर्द्धन्यादेशः स्यात् ष्टुत्वेन पूर्वस्य षत्वम् पिपठीष्षु पिपठीःषु
षु प्रत्येकमिति व्याख्यानादनेकव्यवधाने षत्वं न निंस्व निंस्से नुम्ग्रहणं नुम्स्थानिकानुस्वारोपलक्षणार्थं व्या
ख्यानात् तेनेह न सुहिन्सु पुंसु अत एव नकारग्रहणेन गतार्थता रात्सस्येति सलोपे विसर्गः चिकीः चिकीर्षौ
चिकीर्षः रोः सुपीति नियमान्न विसर्गः चिकीर्षु दमेर्डोस् डित्वसामर्थ्याट्टिलोपः रुत्वविसर्गौ दोः दोषौ

ल

द्र षट् धातवो ऽन्ये जक्षितिश्च सप्तम एते ऽभ्यस्तसंज्ञाः स्युः जक्षत् जक्षतौ जक्षतः एवं जाग्रत् दरिद्रत्
शासत् चकासत् दीधीवेव्योर्ङित्त्वे ऽपि छन्दस्त्वात् प्रत्यये न परस्मैपदं दीध्यत् वेव्यत् गुप् गुब् गुपौ गुपः
गुब्भ्यामित्यादि स्वदादिमुदृशो नानालोचने कञ् च स्वदादिषूपपदेष्वज्ञानार्थात् दृशेर्धातोः कञ् स्यात्
चात् क्विन् आ सर्वनाम्नः सर्वनाम्न आकारो ऽन्तादेशः स्यात् दृग्दृशवतुषु कुत्वस्यासिद्धत्वाद्व्रश्चेति षः त
स्य जश्त्वेन डः तस्य कुत्वेन गः तस्य चर्त्वेन पक्षे कः तादृक् तादृग् तादृशौ तादृशः बहलापवादत्वात् कुत्वेन
खकार इति कैयटहरदत्तादिमतं तु चर्त्वाभावपक्षे ख एव सूत्रे तन्न तु गः जश्त्वं प्रति कुत्वस्यासिद्धत्वात् दि
गादिभ्यो यदिति निर्देशान्नासिद्धत्वमिति वा बोध्यं वस्तुतिमतं जक्षु चर्त्वे विट् विड् विशौ विशः नशो
वा नशेः कवर्गो ऽन्तादेशो वा स्यात् पदान्ते नक् नग् नट् नड् नशौ नशः नग्भ्यां नड्भ्यां स्पृशो ऽनुदके क्विन्
न अनुदके सुप्युपपदे स्पृशेः क्विन् स्यात् घृतस्पृक् घृतस्पृग् घृतस्पृशौ घृतस्पृशः क्विन्प्रत्ययो यस्मा
दिति बहुव्रीह्याश्रयणात् क्विन्नेति स्पृगिक स्पृग मद्गवाकाः जागर्वत जिधृषा प्रागल्भ्ये अस्मादृद्विगादिना

46

सि॰कौ ४६ कस्यैव टल्लते नतु धातोः महश्च हूसाहृच्च्मीत सुहु हिनस्तीति सुहिन् सुहिंसौ सुहिंसः सुहिन्भ्यां सु
हिन्सु ध्वत् ध्वसौ ध्वसः ध्वस्माम इत्यादि एवं स्रुत पुंसो ऽसुङ् सर्वनामस्थाने विवक्षिते ऽसुङ् स्यात् उकार
उच्चारणार्थः बहुपुंसीत्यत्र उजितपेवेतिङ्गीवर्थं कृतेन पूर्णो ऽहुमसुन्निति प्रत्ययस्यापि ग्रहेनैव नुम् सिद्धेः
पुमान् पुमांसौ पुमांसः हे पुमन् पुमांसं पुमांसौ पुंसा पुंभ्यां पुंभिः पुंसु ऋदुशनेत्यनङ् उशना उशना
नौ उशनसः अस्य संबुद्धौ वाऽनङ् नलोपश्च वा वाच्यः हे उशनन् हे उशन हे उशनः उशनोभ्यां इत्यादि अनेहा
अनेहसौ अनेहसः हे अनेहः अनेहोभ्यां वेधाः वेधसौ वेधसः हे वेधः वेधोभ्यामित्यादि अधातोरित्यु
क्तेर्नेह दीर्घः सुवु वस्ते सुवः सुवसौ सुवसः पिंडं ग्रसते पिंडग्रः पिंडग्लः असु ऽलसु अदने अदस ॥
औ सुलोपश्च अदस औकारान्तादेशः स्यात् सौ परे सुलोपश्च तदोः सः सावनन्त्ययोः असौ औत्वप्रति
षेधः साकच्कस्य वा वक्तव्यः सादुत्वं च पातिनेधसं नियोगपाठमुत्वम् तदभावेन प्रवर्तते असकौ अ
सुकः त्यदाद्यत्वं पररूपत्वं वृद्धिः अदसोऽसेरिति मत्वोत्वे एअम् जसः शी अमू गुणाः एतैः द्विवचने अ

पद्भ्न्तितिवाद्दोनन् दोधः दोग्धः दोना दोग्ध्णा विपाप्रवेपाने सनन्ताल्लिङ् प्र सत्वस्यासिद्धत्वात् संयोगान्ते
न्तलोपः वृथ्येतिधः जश्त्वचर्त्वे विविट् विविड् विविड्ढौ विविड्ढः स्कोरितिकलोपः तट् तड् तड्ढौ
तड्ढः गोरट् गोरड् गोरड्ढौ गोरड्ढः तद्भिरड्भि र्भ्यां एवंताभ्यांद्भि यितुस्कोरितिनप्रवर्त्तते एतलोपस्यासिद्ध
वत्वात् पूर्वत्रासिद्धौ चे नस्थानिवद्भितितु तस्यदोधः संयोगादिलोपलत्वणत्वे ष्विति निषिद्धम् तस्मात्संयोगा
न्तलोपएव तक् तग् गोरक् गोरग् स्कोरितिकलोपप्राप्ति कुत्वस्यासिद्धत्वात्संयोगान्तलोपः पियक् पियग् पि
यग्भौ पियग्भः एवं विवक् दिधक् पिसगतौ सुकुगेसतीति सुपीः सुपिसौ सुपिसः सुपिसा सुपीभ्याम् सु
पिक्षु सुपीः षा एवंसुतूः तुसखंडने विद्वान् विद्वांसौ विद्वांसः हे विद्वन् विद्वांसं विद्वांसौ वसोःसंप्रसारण
म् वसंतस्य भस्यसंप्रसारणंस्यात् पूर्वरूपत्वम् मत्वम् विदुषः विदुषा वसुस्रंस्विति दत्वम् विद्वद्भ्यामित्या
दि सेदिवान् सेदिवांसौ सेदिवांसः सेदिवांसम् सेदिवांसौ स्वौलारंगोपीडागमःसंप्रसारणविषयेनप्रवर्त्तते ॥
अकृतव्यूहाइतिपरिभाषया सेदुषः सेदुषा सेदिवद्भ्यामित्यादि सान्तमहतइत्यत्र सांतसंयोगस्यग्रहणात्तिपदि

दिक्, त्यदादि क्विन्निति दृशेः क्विन् विधानात् अन्यत्रापि कुत्वम् दृक् दृग् दृशौ
दृशः ४

सकौं येतु एनाम् एने एनाः एनया ऋत्विगादिना स्त्रजेः क्विन् अमागमश्च निपातितः स्रक् स्रग् स्रजौ स्रजः
४७ स्रजं स्रग्भ्यां स्रक्षु, त्यदाद्यत्वं टाप् स्या स्ये स्याः एवं तद् यद् वाक् वाग् वाचौ वाचः वाग्भ्यां वाक्षु, अपशब्दो
नित्यं बहुवचनान्तः अप्तृन्निति दीर्घः आपः अपः अपोभिः अपस्तकारः स्यादादावत्यपरे अद्भिः अ
द्भ्यः अपां अप्सु दिक् दिग् दिशौ दिशः त्विट् त्विड् त्विषौ त्विषः त्विड्भ्याम् त्विट्सु त्विट्त्सु, उवं सहजु
षते इति सजूः सजुषौ सजुषः सजूर्भ्यां सजूष्षु रुत्वम् आशीः आशिषौ आशिषः आशीर्भ्याम् असौ स्य
दाद्यत्वं टाप् औङः शी उत्वमत्वे अमू अमूः अमूम् अमू अमूः अमुया अमूभ्याम् अमूभिः अमुष्यै अ
मुष्याः अमुयोः अमूनां अमुष्यां अमुयोः अमूषु ॥ इति हलन्ताः स्त्रीलिङ्गाः ॥ स्वमोर्लुक् दत्वं
स्वनडुत् स्वनडुही स्वनड्वांहि चतुरनडुहोरित्याम् पुनस्तद्वत् दिव उत् विमलद्यु अहः अन्तर्वर्ति
नीं विभक्तिमाश्रित्य पूर्वपदस्यैवोत्तरस्य तु स्यादिपदसंज्ञा याजा प्राप्नोति याम् उत्तरपदत्वे चापदादिविधौ
प्रतिषेध इति प्रत्ययलक्षणेन विमलद्वी विमलदिवि अपदादिविधौ किं दधिसेचौ इत्यत्र

अन्तरंगानपि विधीन बहिरङ्गो लु
घते

दसोदात्परस्येत ईत्स्यात दस्य च मो वदेर्व्यत्यैस्तौ अमी पूर्वत्रासिद्धमिति विभक्तिकार्यं प्राक् पश्चाद् उत्वम
त्वे अमुं अमू अमून् मुत्वे कृते घिसंज्ञायां नाभावः न मुने ना भावे कर्त्तव्ये कृते च मुभावो नासिद्धः
स्यात् अमुना अमूभ्यां अमीभिः अमुष्मै अमूभ्याम् अमीभ्यः अमुष्मात् अमूभ्याम् अमीभ्यः
अमुष्य अमुयोः अमीनाम् अमुष्मिन् अमुयोः अमीषु ॥ इति हलन्ताः पुल्लिंगाः
नहोधः नहो हस्य धः स्याज्झलि पदान्ते च उपानत् उपानद् उपानहौ उपानहः उपानद्भ्याम् उपानत्सु
उत्पूर्वात् स्निह धोत्या न्त्रित्यस्मा हृत्विगादिना क्विन् निपातनाद् हलोपः सवे क्विनन्तात् कुत्वे न हस्य घः जश्त्व च
त्वे उष्णिक् उष्णिग् उष्णिहौ उष्णिहः उष्णिग्भ्यां उष्णिक्षु द्यौः दिवौ दिवः दिवा द्यु
भ्याम् इत्यादि गीः गिरौ गिरः एवं पूः पुरौ पुरः चतुरश्चतस्रादेशः चतस्रः चतसृणां किमः कादेश
टाप् का के काः सर्वावत् यः सौ इदमो दस्य मः स्यात् सौ इदमाम: इयं त्यदाद्यत्वे टाप् दश्च इति मः इमे
इमाः अनया हलि लोपः आभ्यां आभिः अस्यै अस्याः अनयोः आसां अस्यां अनयोः आसु अन्वादे

सि कौ रौणादिके ऽजन्तप्रत्यये बोध्यः असृक् असृग् असृजौ असृंजि पद्दन्न इति वा सन् असानि असृजा अस्ना अस
४९ ग्भ्यां असभ्यामित्यादि ऊर्क् ऊर्ग् ऊर्जौ ऊर्ंजि नरजानां संयोगः बहूर्ज्जि नुमुञ्ज इति मेधः अंत्यात्पूर्वो वा नुम्
बहूर्ञ्जि वाल्लुकानि त्यद् स्यत् त्ये त्यानि तत् ते तानि यत् ये यानि एतत् एते एतानि अन्वादेशे तु एनत्
बेभिद्यतेः क्विप् बेभित् बेभिद् बेभिदी योऽल्लोपस्य स्थानिवत्वाज्झलंतलक्षणो नुम् न स्वविधौ स्थानिवद्भा
भावादजंतलक्षणोपि न बेभिदि चेच्छिदि गवाक्शब्दस्य रूपाणि क्लीबेर्चागति भेदतः असंध्यवङ् पूर्वरूपै
नवाधिकशतं मतं स्वमसुप्सु नवषट्भादौ [illegible] के स्युस्त्रीणि जश्शसोः चत्वारि शेषे दशके रूपाणीति वि
भावय २ तथा हि गामञ्चतीति विग्रहे ऋत्विगादिना क्विन् गतौ नलोपः अवङ् स्फोटायनस्येत्यवङ् ग
वाक् गवाग् सर्वत्र विभाषेति प्रकृतिभावे गोअक् गोअग् पूर्वरूपे गोक् गोग् पूजायां नस्य कु
त्वेन ङः गवाङ् गोअङ् गोङ् अस्यैतान्येव नव औङः शी भत्वादच इत्यल्लोपः गोची पूजायां तु ग
वांची गोअंची गोंची जश्शसोः शिः सर्वनामस्थाने नलोपे नुम् गवांचि गोअंचि गोंचि गो

निषेधे कर्त्तव्ये पदत्वमस्त्येव कुलेतु नवाः वारी वारि अऊलंतत्वान्नुम चत्वारि नलुमतेति कादेशो न
किं के कानि इदं इमे इमानि अन्वादेशे नपुंसके एनद्वक्तव्यः एनत् एने एनानि एनेन एनयोः ब्रह्म
ब्रह्मणी ब्रह्माणि हे ब्रह्मन् हे ब्रह्म रोऽसुपि अहभीति विभागादि एषोः अह्नी अहनी अहानि अहन्
अह्न् निसस्युरः स्यात पदांते अहोभ्यां अहोभिः इहस्मरहः अहोभ्यामित्यादौ रलरुत्वयोरसिद्धत्वान्नलोपे
प्राप्ते अहन्नित्यावचनेन लोपाभावं निपात्य द्वितीयेनरु विधेयः तदेतस्यापि रुत्व रत्वे दीर्घा एषु हानियस्मि
न संदीर्घो हानिदाघः इह हल्ङ्यादिलोपे प्रत्ययलक्षणेनासुपीति निधाइत्वाभावेरः तस्यासिद्धत्वान्नां
तलक्षणे उपधादीर्घः संबुद्धौ तु हे दीर्घा हो निदाघ दीर्घाहानौ दीर्घाहानः दंडि दंडिनौ दंडिनि स्रग्वि
स्रग्विणी स्रग्वीणि वाग्मि वाग्मिनी वाग्मीनि बहुवृत्रहाणि बहुपूषाणि बह्वर्यमाणि असृजः पदांते
कुलं सृजेः क्विबोधानात् विश्वसृडादेन सृजिदृशोरिति सृजेरज्जु सृड्ढामिति भाष्यप्रयोगात् यद्वा ब्रह्मादि
सृजेसृजियज्योः पदांते षत्वं कुलापवादः सृज्ज्ञमिकर्माद्वयोस्त्वनिपातनादेवकुत्वं असृक्शब्दस्त्वसृते